# 26

# समसामयिकं संस्कृतसाहित्यम्

भारतस्य प्रतिष्ठे द्वे संस्कृतं चैव संस्कृतिः। साहित्यं समाजस्य प्रतिबिम्बं भवति। संस्कृतभाषा शाश्वती भाषा अस्ति। अतः अस्यां सर्वदा एव साहित्यरचना अभवत्, भवति, भविष्यति च। संस्कृतसाहित्यभागीरथी अविच्छिन्नरूपेण सततं वहति। यथा प्राचीनकाले साहित्यरचना अभवत् तथैव वर्तमानकालेऽपि संस्कृतसाहित्यस्य ग्रन्थानां रचना क्रियते। सम्पूर्णे भारते कवयः संस्कृतसाहित्यनिर्माणे संलग्नाः सन्ति। गद्यं, पद्यं, रूपकं, सर्वेषु एव साहित्यरचना उपलभ्यते। अस्मिन् पाठे समसामयिकसंस्कृतसाहित्यस्य किं वैशिष्ट्यम् काः च नूतनाः प्रवृत्तयः इति पठिष्यामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'समसामयिकम् इति पदस्य अभिप्रायं स्पष्टीकरिष्यति;
- समसामयिकसाहित्यस्य विधानां परिचयं लेखिष्यति;
- समसामयिकसाहित्यस्य ग्रन्थानां नामानि लेखिष्यति;
- समसामयिककवीनां नामानि वक्ष्यति;
- वर्तमानकाले प्रकाश्यमानानां पत्रपत्रिकाणां नामोल्लेखं करिष्यति;
- समाचारपत्र–पत्रिकाणां वारंवारितां स्पष्टीकरिष्यति।



टिप्पणी





## क्रियाकलापः

अधोलिखितानां ग्रंथानां नामानि यथास्थानं लिखत

उत्तररामचरितम्, कुमारसम्भवम्, ऋक्, छान्दोग्यम्, यजुः, नागानन्दम् शिशुपालवधम्, केन, किरातार्जुनीयम् अथर्व, शाकुन्तलम्, ऐतरेय

| | 1 | 2 | 3 |
|---|---|---|---|
| वेदाः | ऋक् | -------- | -------- |
| उपनिषदः' | -------- | -------- | छान्दोग्यम् |
| महाकाव्यानि | -------- | शिशुपालवधम् | -------- |
| नाटकानि | नागानन्दम् | -------- | -------- |

## 26.1 अधुना अवगच्छामः

### प्रथमः अंशः

संस्कृतम् अखिलभारतीयभाषा। यत् साहित्यं वर्तमानकाले लिख्यते तत् समसामयिकं साहित्यं कथ्यते। भारतस्य स्वतंत्रताप्राप्तेः अनन्तरम् प्रभूतं संस्कृतसाहित्यं विरचितम् अस्ति। अस्मिन् साहित्ये पुरातनानां सर्वासां विधानां पालनं क्रियते। महाकाव्यानि, खण्डकाव्यानि, गद्यकाव्यानि, कथाः नाटकादीनि मुक्तककाव्यानि सर्वाणि एव काव्यानि लिखितानि सन्ति। काश्चन नूतनाः प्रवृत्तयः अपि संस्कृतसाहित्ये आगताः यथा एकांकिनाटकानि, मुक्तककाव्यानि, सूडोकविता, हाइकोकविताः इत्यादयः।

> सूडो कविता जापानदेशे प्रचलिता साहित्यविधा अस्ति, यस्याम् अतिन्यूनैः शब्दैः भावानाम् अभिव्यक्तिः क्रियते। 'हाइको' कवितायाम् पंक्तिद्वयेन पंक्तित्रयेण वा भावानाम् अभिव्यक्तिः भवति।

### मुक्तककाव्यानि

संस्कृतकाव्यसाहित्यं प्रायः छन्दोबद्धम् अस्ति। अत्र पद्ये वर्णानां संख्या, लघुदीर्घवर्णक्रमः निश्चितः भवति (वार्णिकं छन्दः) अथवा मात्राणां संख्या निर्धारिता भवति (मात्रिकं छन्दः)। आधुनिककाले केचन कवयः भावानां प्राबल्यं, लयप्राधान्यम् मनसि कृत्वा काव्यानि रचयन्ति। तानि मुक्तछंदांसि कथ्यन्ते। मुक्तककाव्येषु प्रत्येकं पद्यं स्वतंत्रं भवति।

### एकाङ्कीनाटकानि

एतेषु नाटकेषु एकः एव अङ्कः भवति तत्र विविधानि दृश्यानि भवन्ति। इदानीं विद्यालयेषु प्रायः एकाङ्कीनाटकानां म×चनं भवति।

## पाठगतप्रश्नाः 26.1

1. संस्कृतभाषा किम् एकस्य प्रदेशस्य भाषा अथवा सम्पूर्णभारतस्य?
2. शाश्वती भाषा का अस्ति?
3. संस्कृतकाव्यलेखकाः कस्मिन् प्रदेशे वसन्ति?
4. समसामयिकसाहित्यं किं भवति?
5. संस्कृतसाहित्ये नूतनाः प्रवृत्तयः काः?

---

## द्वितीयः अंशः

## 26.2 महाकाव्यानि

सर्गबद्धं दीर्घकथावृत्तं चरित्रं वा विषयीकृत्य कविना लिखितं महाकाव्यं भवति। भवद्भिः कुमारसम्भवात् हिमालयवर्णनं पठितम्। कुमारसम्भवं महाकाव्यम् अस्ति। एवमेव रघुवंशम् नैषधचरितम्, इत्यादीनि सर्वाणि प्राचीनकाले प्रसिद्धानि महाकाव्यानि। इदानीमपि अनेकानि महाकाव्यानि निरूप्यन्ते–

| महाकाव्यानि | लेखकाः |
|---|---|
| • स्वातन्त्र्यसम्भवम्<br>उत्तरसीताचरितम् | रेवाप्रसाद द्विवेदी |
| • जानकीजीवनम् | राजेन्द्र मिश्रः |
| • इन्दिरागांधीचरितम् | सत्यव्रतशास्त्री |
| • जवाहरज्योतिमहाकाव्यम् | जी. बी. पल्सुले |
| • श्रीभार्गवराघवीयम्<br>(परशुराम–रामकथा) | रामभद्राचार्यः |

एतानि अतिप्रसिद्धानि कानिचित् महाकाव्यानि। श्रीरामभद्राचार्यः बाल्यकालाद् एव नेत्रज्योतिहीनः तथापि सः महाकाव्यं रचितवान् अनेकान् पुरस्कारान् उपाधीन् च लब्धवान्।

### खण्डकाव्यानि/मुक्तककाव्यानि/यात्राकाव्यानि

कथायाः एकं प्रसंगं खण्डं वा विषयीकृत्य रचितं काव्यं खण्डकाव्यं कथ्यते यथा

मेघदूतम्। प्रत्येकं पद्यं यत्र स्वतन्त्रं भवति तत् मुक्तककाव्यं कथ्यते। येषु काव्येषु यात्रायाः वर्णनं भवति तानि यात्राकाव्यानि उच्यन्ते।

प्रमुखानि विविधानि काव्यानि अधोलिखितानि सन्ति–

**काव्यानि**

- रामकृष्णपरमहंसीयम्
- गुरुगोविन्दसिंहचरितम्
- षड्ऋतुवर्णनम्
- गोवर्धनगौरवम्

| **यात्राकाव्यानि** | **लेखकः** |
|---|---|
| ● शर्मण्यदेशः सुतरांविभाति | डॉ. सत्यव्रतशास्त्री |
| ● थाईदेशविलासम् | डॉ. सत्यव्रतशास्त्री |

**पत्रकाव्यानि**

छन्दोबद्धानि पत्राणि येषु काव्येषु संकलितानि क्रियन्ते तानि पत्रकाव्यानि उच्यन्ते।

| | |
|---|---|
| ● करुणाकटाक्षलहरी | रसिकबिहारी जोशी |

**गीतिकाव्यानि**

| | |
|---|---|
| ● राघवीयगीतगु×जनम्, भक्तिगीतसुधा | रामभद्राचार्यः |
| ● तदेव गगनं सैव धरा | श्रीनिवासरथः |
| ● भाति मे भारतम् | डॉ. रमाकान्त शुक्लः |

**मुक्तककाव्यानि**

मुक्तककाव्ये प्रत्येकं पद्यं स्वतन्त्रं भवति। जीतरामभट्टस्य 'अनुभूतिशतकम्', अशोक डबरालस्य 'क्षुधते मे हृदयं' प्रमुखाः काव्यसंग्रहाः सन्ति।

**शतककाव्यानि**

शतककाव्येषु प्रायः शतम् पद्यानि भवन्ति। शतककाव्यानां लेखकाः बहवः सन्ति। तत्र प्रमुखानि शतककाव्यानि सन्ति –

| | |
|---|---|
| ● पाथेयशतकम् | डॉ. रामकरण शर्मा |
| ● भारतशतकम् | डॉ. राजेन्द्र मिश्रः |
| ● इन्दिराकीर्तिशतकम् | डॉ. श्रीकृष्ण सेमवालः |
| ● स्वातन्त्र्यवीरशतकम् | श्रीधर भास्कर वर्णेकरः |

### दूतकाव्यानि

कालिदासस्य मेघदूतम् अनुकृत्य बहूनि दूतकाव्यानि कविभिः लिखितानि। दूतकाव्ये दूतद्वारा कश्चन सन्देशः प्रेष्यते। मेघदूते मेघः एव दूतः तत्र विरहपीडितः यक्षः दूतेन मेघेन स्वप्रियतमां प्रति सन्देशं प्रेषयति। कानिचित् प्रसिद्धानि दूतकाव्यानि अघोलिखितानि सन्ति –

- काकदूतम्
- बकदूतम्
- शुकदूतम्
- कोकिलदूतम्
- हंससन्देशः

### सूडोकाव्यम्

सूडोकवितायां द्वे वा तिस्रः एव पंक्तयः भवन्ति। हर्षदेवमाधवः सूडोकवितानां क्षेत्रे प्रयोगम् अकरोत्। तस्य काव्यं 'निष्क्रान्ताः सर्वे' संस्कृत–समसामयिकसाहित्ये नूतनां काव्यविधां प्रस्तौति।

## पाठगतप्रश्नाः 26.2

1. समसामयिकसंस्कृतसाहित्ये कति महाकाव्यानि लिखितानि सन्ति?
2. स्वातन्त्र्यसम्भवम् महाकाव्यं केन लिखितम्?
3. सत्यव्रतशास्त्रिणा इन्दिरागांधिम् आश्रित्य किं महाकाव्यं रचितम्?
4. श्रीभार्गवराघवीयम् काव्यस्य विषयः कः ?
5. थाईदेशविलासम् कीदृशं काव्यम् अस्ति, महाकाव्यं/यात्राकाव्यम्।
6. तदेव गगनं सैव धरा इति कस्य कवेः रचना?
7. अभिराजराजेन्द्रमिश्रेण कृतस्य शतककाव्यस्य नाम लिखत।

---

## तृतीयः अंशः

## 26.3 पद्यात्मककाव्य–नाटकम्

अस्माभिः पद्यात्मककाव्यविषये पठितम्। इदानीं समसामयिकनाटकसाहित्यस्य विषये जानीमः। वर्तमानकाले अपि नाटकानां प्रचुरं लेखनम् अभवत्। प्रायः शतात् अधिकानि

नाटकानि लिखितानि। कानिचित् नाटकानि परम्परागतविधिना लिखितानि। यथा भरतमुनेः नाट्यशास्त्रे वर्णितम्। परन्तु इदानीम् एकाङ्किनाटकानि अपि लिख्यन्ते। एकाङ्किनाटके दृश्यानि अनेकानि भवन्ति परन्तु सम्पूर्णं नाटकम् एकां घटनां समस्यामेव अङ्गीकृत्य लिख्यते।

कानिचित् प्रसिद्धानि नाटकानि सन्ति–

| नाटकम् | लेखकः |
|---|---|
| विवेकानन्दविजयम् | श्रीधरभास्करवर्णेकरः |
| शिवराज्याभिषेकम् | |
| समानमस्तु वो मनः | गजानन बालकृष्ण पल्सुले |
| धन्योऽहं धन्योऽहम् भासो हासः | |
| मेनकाविश्वामित्रम् | हरिनारायण दीक्षितः |

**एकाङ्किनाटकानि**

पण्डितक्षमारावद्वारा चत्वारि त्र्यङ्कात्मकानि सप्त च एकाङ्किनाटकानि रचितानि। अभिराजराजेन्द्रमिश्रमहोदयैः अनेकानि एकाङ्किनाटकानि लिखितानि। पल्सुलेमहोदयद्वारा 'अथातो ज्ञानेश्वरोऽभूत्' नाम्ना लघुनाटक–संग्रहः प्रकाशितः। नोदनाथमिश्रकृतं 'नवमालती' एकाङ्किनाटकम् अपि प्रसद्धिम् अस्ति। एतेषां नाटकानां समये समये मञ्चनम् अपि भवति।

## 26.4 चम्पूकाव्यानि

गद्यपद्यमयं काव्यं 'चम्पूः' इति कथ्यते।

पण्ढरीनाथाचार्यगलगली द्वारा त्रीणि चम्पूकाव्यानि रचितानि –

1. पवनपावनचम्पूः
2. सत्यध्यानविजयचम्पूः
3. श्रीशम्भूविजयलिङ्गेश्वरचम्पूः।

   जयमन्तमिश्रमहोदयस्य महामानवचम्पूः भारतस्य गौरवगाथां जीवनदर्शनं च प्रस्तुतं करोति।

## 26.5 गद्यकाव्यानि

गद्ये पदप्रयोगस्य बन्धनं न भवति अतः गद्यलेखकः स्वतन्त्रः भवति परन्तु गद्ये अपि चमत्कारः भवति अतः गद्यलेखने एव कवेः परीक्षा भवति। कानिचित् आधुनिकानि गद्यकाव्यानि सन्ति–

| **काव्यम्** | **लेखकः** |
|---|---|
| द्वा सुपर्णा | डॉ. रामजी उपाध्यायः |
| रयीशः | डॉ. रामकरण शर्मा |
| गुहावासी | सत्यप्रकाशसिंहः |

अनेके कथासंग्रहाः अपि सन्ति यथा–

| **काव्यम्** | **लेखकः** |
|---|---|
| 1. कथाप×चकम् | 'पण्डितक्षमाराव' इति |
| 2. ग्रामज्योतिः | |
| 3. कथासंग्रहः | वनमालीविश्वासः |

## 26.6 अनूदितसाहित्यम्

यूयं जानीथ एव यत् साहित्यं तु सर्वासु एव भाषासु लिख्यते। तेषाम् अनुवादं पठित्वा वयं तेन साहित्येन परिचिताः भवामः। एवं संस्कृतसाहित्यस्य वृद्धिः अपि भवति।

केचन अनूदितग्रन्थाः निम्नलिखिताः सन्ति –

| **कविः** | **ग्रन्थाः** | **अनुवादकर्ता** |
|---|---|---|
| रवीन्द्रनाथ ठाकुरः | गीतांजलिः | संस्कृत आकादमी |
| जयशंकर प्रसादः | कामायनी | संस्कृत आकादमी |
| धर्मग्रन्थः | कुरानः/बाइबिलः | वनेश्वरपाठकः |
| | तेनालीरामकथा | ओमप्रकाश ठाकुरः |

एवम् अनेके प्रसिद्धाः ग्रन्थाः इदानीं संस्कृत–भाषायाम् अनूदिताः सन्ति।

## 26.7 पत्रपत्रिकाः

कस्याः अपि भाषायाः समसामयिकसाहित्यं पूर्वं पत्रिकासु एव प्रकाश्यते। सम्पूर्णभारते विविधेषु प्रान्तेषु अनेकाभिः संस्थाभिः शताधिकाः पत्रपत्रिकाः प्रकाश्यन्ते। त्रीणि समाचार–पत्राणि दैनिकानि सन्ति – सुधर्मा, नवप्रभातम्, भारतवर्षजनतादैनिकसंस्कृतम् इति। चतस्रः पत्रिकाः साप्ताहिक्यः सन्ति। एवं काश्चन पत्रिकाः मासे मासद्वये, मासत्रये वा प्रकाश्यन्ते। एतासु पत्रिकासु विविधाः समाचाराः, शोधकार्याणि, कविताः धारावाहिकरूपेण पद्यकाव्यानि, गद्यकाव्यानि च प्रकाश्यन्ते। भारतीयविश्वसंस्कृतम् अर्वाचीनसंस्कृतम् चन्दामामा, सम्भाषणसंस्कृतम्, विश्वभाषा, संस्कृतम×जरी इत्यादिपत्रिकाः विशेषरूपेण लोकप्रियाः सन्ति।

# 27

# भारतस्य ज्ञानविज्ञानपरम्परा

सम्प्रति सर्वस्मिन् जगति संस्कृतस्य भारतीय–संस्कृतेश्च अप्रतिमं महत्त्वं सर्वैः स्वीक्रियते। यदा अन्यत्र संस्कृतेः उद्भवः अपि न जातः तदा भारते संस्कृतिः प्रगतेः पराकाष्ठां प्राप्तवती। संस्कृत–भाषायां वेद–वेदाङ्गेषु, दार्शनिकग्रन्थेषु धर्मशास्त्रादिषु च न केवलं धार्मिकं तात्त्विकं च चिन्तनम् उपलभ्यते अपितु मानवहिताय वैज्ञानिकचिन्तनमपि पदे पदे प्राप्यते। अतः भारतभूमौ प्राचीनकालतः एव ज्ञान–विज्ञान–परम्परा प्रवर्तते। गणित–ज्योतिष्–रसायन–भौतिकी–खगोलविज्ञान–आयुर्वेद–वास्तुविज्ञान–कृषिविज्ञान–पर्यावरणविज्ञानादीनां प्रभूतं ज्ञानम् अस्माकं प्राचीनग्रन्थेषु सन्निहितं वर्तते। अस्मिन् पाठे वयं कतिपयेषु वैज्ञानिकविषयेषु भारतीय–मनीषिणां विशिष्टेन योगदानेन परिचिताः भवामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- गणित–ज्योतिश्शास्त्रयोः आर्यभटस्य भास्कराचार्यस्य च अवदानस्य वर्णनं करिष्यति।
- चिकित्साक्षेत्रे चरकसुश्रुतयोः योगदानस्य विवेचनं करिष्यति।
- कृषिविज्ञाने भारतीयचिन्तनस्य उपयोगितां वर्णयिष्यति।
- वास्तुविज्ञाने विमानशास्त्रे च भारतीयवैज्ञानिकानां चिन्तनस्य महत्त्वं प्रतिपादयिष्यति।
- पर्यावरणविज्ञाने सन्निहित–चिन्तनम् अभिव्यक्तं करिष्यति।
- प्राचीनभारतीयमनीषिणां वैज्ञानिकचिन्तनस्य वर्तमाने प्रासङ्गिकतायाः मूल्याङ्कनं करिष्यति।

## क्रियाकलापः




27.1

| संख्या | ग्रहस्य नाम | सूर्यात् दूरता (दशलक्ष किलोमीटरः) | व्यासः (किलोमीटरः) |
|---|---|---|---|
| 1 | बुधः | 58 | 4,878 |
| 2 | शुक्रः | 108 | 12,104 |
| 3 | पृथिवी | 150 | 12,756 |
| 4 | मंगलः ..... क्षुद्रग्रहाः | 228 | 6,796 |
| 5 | बृहस्पतिः | 778 | 1,43,00 |
| 6 | शनिः | 1427 | 120,540 |
| 7 | अरुणः (यूरेनस) | 2,869 | 51,120 |
| 8 | वरुणः (नेप्च्यून) | 4,496 | 49,500 |
| 9 | यमः (प्लूटो) | 5,900 | 3,000 |

उपरि अङ्कितं चित्रं दृष्ट्वा अधोलिखितान् प्रश्नान् उत्तरत–

1. पृथिव्याः निकटतमः ग्रहः कः?
2. कयोः ग्रहयोः मध्ये क्षुद्रग्रहाः सन्ति?
3. पृथिवी कयोः ग्रहयोः मध्ये स्थिता अस्ति?

## 27.1 अधुना अवगच्छामः

### प्रथमः अंशः

#### गणितम्

भारते गणितविज्ञानस्य प्रारम्भः वैदिककालात् एव अभवत्। वैदिक–वाङ्मये तात्कालिकेषु अन्येषु ग्रन्थेषु च गणितीयानाम् अंशानाम् उल्लेखः विशेषतः दृश्यते। जगति एतत्





स्वीक्रियते यत् बहूनां गणितीयांशानाम् आरम्भः भारते एव जातः। एवं हि बहूनि अपूर्वाणि मूलभूतानि अनुसन्धानानि अत्र एव अभवन्। पश्चात् अन्यदेशीयैः अपि इदं ज्ञानं भारतादेव प्राप्तम्।

इदानीं वयं केषाञ्चित् महत्त्वपूर्णानाम् अनुसन्धानानां विषये विवेचनं करिष्यामः।

### दशमाङ्कपद्धतिः

साम्प्रतं सर्वत्र प्रयुक्ता 'दशमाङ्कपद्धतिः' तु भारतस्य एव महत्त्वपूर्णं योगदानं वर्तते। एतस्यां पद्धतौ 1–9 अङ्काः शून्यं च उपयुज्यन्ते। अस्यां स्थानपरिवर्तनेन सह अङ्कानां मूल्ये परिवर्तनमपि अङ्गीक्रियते। एषा पद्धतिः द्विसहस्रवर्षेभ्यः पूर्वम् एव भारते प्रचलिता आसीत्।

### शून्यम्

संस्कृतभाषायां 'शून्यम्' ( 0 ) नास्तित्वं सूचयति। अङ्कस्थानाधारिता मूल्यनिश्चयपद्धतिः एव शून्यस्य अन्वेषणे मूलम्। शून्यस्य अवधारणा अपि सर्वप्रथमं संस्कृतवाङ्मये एव प्राप्यते। पिङ्गलस्य छन्दःसूत्रे (200 ई. पू.) शून्यस्य सङ्केतः लभ्यते।

### बौधायनसूत्रम् (पाइथागोरस–सिद्धान्तः)

$$\text{क ख}^2 + \text{ख ग}^2 = \text{क ग}^2$$

$$\text{लम्बः}^2 + \text{आधारः}^2 = \text{कर्णः}^2$$




इदानीं पाइथागोरससिद्धान्तनाम्ना प्रथितः एषः नियमः पाइथगोरसात् सहस्राधिकवर्षेभ्यः पूर्वम् एव निर्मितः आसीत्। पाइथगोरसमहोदयः तस्य विस्तारं कृतवान्। अयं प्रमेयः मूलतः तु शुल्वप्रमेयः वर्तते। शुक्लयजुर्वेदस्य बौधायनशुल्वसूत्रे, कात्यायनशुल्वसूत्रे, आपस्तम्बशुल्वसूत्रे मानवशुल्वसूत्रे च एतत् सूत्रम् उपलभ्यते। बौधायनादयः मुनयः एतं नियमं प्रतिपाद्य यथायोग्यं विवरणम् अपि दत्तवन्तः। विभिन्नाकाराणां यज्ञवेदीनां निर्माणे एतस्य सिद्धान्तस्य उपयोगः क्रियते स्म।

### 'पाई' इत्यस्य मूल्यम्

आर्यभट्स्य (476 ई.) गणितज्योतिर्विज्ञानक्षेत्रे महत्त्वपूर्णं योगदानम् अस्ति। सः 121 श्लोकात्मके 'आर्यभटीयम्' इति ग्रन्थे सर्वप्रथमं वृत्तस्य परिधिव्यासयोः अनुपातस्य (π पाई) इत्यस्य मूल्यं निर्धारितवान्। तत् 3.1416 भवति। आधुनिकवैज्ञानिकानां मते अपि

एतत् मूल्यं 3.1416926 वर्तते। आर्यभटेन एव प्रतिपादितम् यत् – "मृज्जलशिखिवायुभ्यो भूगोलः सर्वतो वृत्तः"।

**पृथिव्याः सूर्यं परितः परिभ्रमणम्**

आर्यभटेन एव स्वग्रन्थे "पृथिवी सूर्यं परितः परिभ्रमति" इत्यपि साधितम् अस्ति।

आर्यभट्स्य अमूल्यं योगदानं मनसि निधाय एव भारतीयैः वैज्ञानिकैः तस्य नाम्ना 'आर्यभटः' उपग्रहोऽपि विनिर्मितः।

संस्कृतवाङ्मये आर्यभटसदृशानां गणितज्ञानाम् एका महती परम्परा विद्यते। केषाञ्चित् प्रमुखगणितज्ञानां नामानि अत्र लिख्यन्ते –

(1) आर्यभटः (476 ई.) – आर्यभटीयम्

(2) ब्रह्मगुप्तः (598–660 ई.) – ब्रह्मस्फुटसिद्धान्तः

(3) श्रीधरः (750 ई.) – खण्डखाद्यकरणम्, त्रिशतिका, पाटी गणितम्, बीजगणितम् च।

(4) महावीराचार्यः (850 ई.) – गणितसारसंग्रहः

(5) श्रीपतिः (1039 ई.) – सिद्धान्तशेखरः, गणिततिलकम्

(6) भास्कराचार्यः द्वितीयः (1114 ई.) – सिद्धान्तशिरोमणिः, करणकुतूहलम्, लीलावती, बीजगणितम्

**धनऋणगुणविभागादीनां ज्ञानम्**

यजुर्वेदस्य मन्त्रेषु धन–ऋण–गुण विभागादीनां परिज्ञानमपि उपलभ्यते – "एका च मे तिस्रश्च मे तिस्रश्च मे प×चचमे प×च च मे सप्त च मे सप्त च मे नव च मे नव च मे।"

(यजुर्वेदः 18.24)

**संख्याविषयकं चिन्तनम्**

ऋग्वेदे '1000' इत्यर्थे 'सहस्रम्', '10,000' इत्यर्थे 'अयुतम्' इत्यस्य प्रयोगः अनेकशः कृतः।

यजुर्वेदस्य वाजसनेयीसंहितायां सप्तदशे अध्याये एका संख्यानां नामसूची वर्तते–

दशन् – ($10^{1}$) शतम् – ($10^{2}$)

सहस्रम् – ($10^{3}$) अयुतम् – ($10^{4}$) नियुतम् – ($10^{5}$) प्रयुतम् – ($10^{6}$)

अर्बुदम् – ($10^{7}$) न्यर्बुदम् – ($10^{8}$) समुद्रम् – ($10^{9}$)

मध्यम् – ($10^{10}$) अन्तम् – ($10^{11}$) परार्द्धम् – ($10^{12}$)

कोटितः अग्रे लक्षगुणनोत्तरप्रणाल्याः एकं सुन्दरम् उदाहरणं वाल्मीकिरामायणे युद्धकाण्डे प्राप्यते। इयं लक्षोत्तरप्रणाली तालिकारूपेण अधः प्रदीयते –

कोटिः – ($10^{7}$) शङ्कुः – ($10^{12}$) महाशङ्कुः – ($10^{17}$)

वृन्दम् – ($10^{22}$) महावृन्दम् – ($10^{27}$)

पद्मम् – ($10^{32}$) महापद्मम् – ($10^{37}$)

खर्वम् – ($10^{42}$) महाखर्वम् – ($10^{47}$)

समुद्रम् – ($10^{50}$) ओघः – ($10^{55}$) महाओघः – ($10^{60}$)

अस्याः लक्षगणनोत्तरप्रणाल्याः उपयोगं कृत्वा शुकनामगुप्तचरः रावणं रामस्य सेनायाः योद्धानां संख्याम् अकथयत्। तस्य सेनायां कोटिसहस्रं शङकूनां शतं, महाशङ्कुसहस्रं, वृन्दशतं, महावृन्दसहस्रं, पद्मशतं, महापद्मसहस्रं, खर्वशतं, समुद्रशतं, ओधशतं, महौघशतं, कोटिमहौघः सैनिकाः, विभीषणः, सुग्रीवः, तस्य सचिवाश्च आसन्। अर्थात् रामस्य सैन्यबलानि –

($10^{10}+10^{14}+10^{20}+10^{24}+10^{30}+10^{34}+10^{40}+10^{44}+10^{52}+10^{57}+10^{62}+10^{67}+5$) आसन्।

## ज्योतिश्शास्त्रम्

वैदिकवाङ्मये 'ज्योतिष्' इति नाम वेदाङ्गं वर्तते। असंख्याः ग्रहाः सन्ति, अन्यसौरमण्डलानि अपि भवितुम् अर्हन्ति इत्यादयः विचाराः भारतीये ज्योतिश्शास्त्रे रूढमूलाः सन्ति। ग्रहाणां स्थितिः परस्पराकर्षणं, ग्रहणस्वरूपम् इत्यादीनि अत्र विस्तरेण उक्तानि। नक्षत्रगणनायाः, ग्रहविचारणायाः कालगणनायाश्च विलक्षणा क्षमता भारतीयज्योतिश्शास्त्रिषु आसीत्। कुजग्रहस्य (मंगलग्रहस्य) स्वरूपं "चपलः सरक्तगौरः मज्जासारश्च माहेयः" इत्येवम् आचार्यः वराहमिहिरः उक्तवान्। आधुनिक वैज्ञानिकाः वदन्ति – "कुजस्य उपरि उग्रतुषारावरणम् अस्ति तेन सः रक्तवर्णयुक्तः धवलवर्णः तत्र दृश्यते" इति। "कुजः" (भूमिपुत्रः) इति शब्दः एव तद्ग्रहे जीवसम्भाव्यतां प्रकाशयति। आधुनिकाः विद्वांसः अपि एतत् एव वदन्ति खलु। 'सूर्यादीनां स×चारः भ्रममूलः " " ग्रहाणां स्वप्रकाशता नास्ति। इत्यादयः बहवः वैज्ञानिकाः सिद्धान्ताः आर्यभटेन प्रतिपादिताः।

'फलितज्योतिश्शास्त्रस्य विकासे पूर्वमध्यकालः महत्त्वपूर्णः। सिद्धान्तसंहिताहोरादिभेदानां निर्माणम्, अंकगणितस्य, बीजगणितस्य रेखागणितस्य च सिद्धान्तानां विकासः अस्मिन् एव काले अभवत्।' फलितज्योतिष्' अपि अस्य एव कालस्य अवदानम्। आचार्यः वराहमिहिरः अस्य युगस्य विद्वत्सु अग्रगण्यः। बृहद्जातकम्, प×चसिद्धान्तिका, बृहद्यात्रा, बृहद्संहिता च अस्य प्रतिनिधिग्रन्थाः वर्तन्ते।

भारतीयज्योतिश्शास्त्रे भास्कराचार्यस्य "सिद्धान्तशिरोमणिः" अपि प्रसिद्धः ग्रन्थः। अस्य लीलावती, बीजगणितं, ग्रहगणितं गोलाध्यायश्च चत्वारः भागाः सन्ति। ज्योतिश्शास्त्रविषयकानां ग्रन्थानां रचनापरम्परा प्राचीनकालतः प्रारब्धा अद्यापि प्रचलति।

## पाठगतप्रश्नाः 27.1

1. आर्यभटस्य जन्म कदा अभवत्?
2. आर्यभटस्य ग्रन्थस्य नाम किम्?

3. आर्यभटेन π (पाइ) इत्यस्य किं मूल्यम् निर्धारितम्?
4. लम्ब $^2$ + आधारः $^2$ = ................ ।
5. 'सिद्धान्तशिरोमणिः' ग्रन्थः केन लिखितः?
6. वराहमिहिरस्य प्रतिनिधिग्रन्थानां नामानि कानि?

टिप्पणी

## द्वितीयः अंशः

## 27.2 आयुर्वेदः

आयुर्वेदः विज्ञानस्य तत् क्षेत्रं यस्मिन् विकासस्य सर्वाधिकं सम्भावना वर्तते। अस्य महत्त्वं सार्वभौमिकं सार्वकालिक×च विद्यते। आरोग्यस्य महत्त्वं सर्वैः सर्वदा स्वीक्रियते। उक्त×च–

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।
रोगास्तस्यापहर्त्तारः श्रेयसो जीवितस्य च।।

अत एव वयं कामयामः – "जीवेम शरदः शतम्"। आयुर्वेदस्य उद्देश्यम् अस्ति – स्वास्थ्यरक्षणं रोगानां निवारणं च। आयुर्वेदस्य गणना चतुर्षु उपवेदेषु भवति। एषः प्रायः ऋग्वेदस्य उपवेदः मन्यते। परं केषा×चत् विदुषां मते एषः अथर्ववेदस्य उपवेदः। सर्वप्रथमम् अथर्ववेदे एव मानवरोगाः, पशुरोगाः तेषां प्रतिकाराश्च वर्णिताः।

भारतीयपरम्परानुसारं ब्रह्मा सर्वप्रथमं आयुर्वेदस्य प्रवर्तनम् अकरोत्। तदनन्तरं प्रजापतिः, अश्विनौ, इन्द्रश्च क्रमशः आयुर्वेदविद्याम् अधिगतवन्तः। इन्द्रः एतस्याः विद्यायाः प्रवर्तनं लोके कृतवान्। लोके अस्याः तिस्रः परम्पराः जाताः–

(क) भरद्वाजपरम्परा (ख) धन्वन्तरिपरम्परा (ग) काश्यपरम्परा च।

आयुर्वेदस्य ग्रन्थाः अपि त्रिविधाः–

(क) संहिता–ग्रन्थाः (ख) व्याख्या–ग्रन्थाः (ग) विशिष्टविषयाधृताः ग्रन्थाः

अत्र आयुर्वेदस्य प्रमुखग्रन्थानां संक्षिप्तपरिचयः प्रदीयते–

**(क) चरकसंहिता–** 120 अध्यायात्मके अस्मिन् ग्रन्थे सर्वेषां विषयानां प्रतिपादनं कृतम्। अस्मिन् प्रमुखतया त्रिदोषवर्णनं कृतम्। ग्रन्थेऽस्मिन् सर्वेषां रोगाणां चिकित्सा वर्णिता।

**(ख) सुश्रुतसंहिता–** अस्मिन् ग्रन्थे अपि 120 अध्यायाः सन्ति। अस्मिन् प्रमुखतया शल्य–क्रियायाः वर्णनं शल्य–क्रियायाः उपकरणानां परिचयः च प्राप्येते। सुश्रुतसंहितायां सर्वप्रथमं त्वक्प्रत्यारोपणस्य वर्णनं कृतम्।



27.2: **जलं पीत्वा वमनक्रियया पित्तरोगशमनम्**

**(ग) अष्टाङ्गहृदयम्**– 661 शताब्द्यां वाग्भटेन विरचिते अस्मिन् ग्रन्थे रसायनतन्त्रस्य वर्णनं विशेषरूपेण उपलभ्यते। वाग्भटस्यैव 'अष्टाÂसंग्रहः' अपि प्रमुखः ग्रन्थः वर्तते।

**(घ) भावप्रकाशः** – षोडशशताब्द्यां भावमिश्रेण विरचिते अस्मिन् ग्रन्थे सर्वेषाम् अङ्गानां चिकित्सायाः वर्णनं विद्यते।

माधवस्य माधवनिदानम्, शार्ङ्गधरस्य शार्ङ्गधरपद्धतिः, वृन्दस्य सिद्धियोगः, वाग्भटस्य रसरत्नसमुच्चयः गोविन्ददासस्य भैषज्यरत्नावली इत्यादयः अपि आयुर्वेदस्य महत्त्वपूर्णाः ग्रन्थाः सन्ति। आयुर्वेदस्य ओषधीनां गुणदोषवर्णनार्थं निघन्टुग्रन्थाः अपि विरचिताः। धन्वन्तरिनिघण्टुः, मदनपालनिघण्टुः, शब्दप्रदीपः राजनिघण्टुश्च उल्लेखनीयाः ग्रन्थाः वर्तन्ते।



27.3: **जलौकस्य प्रयोगेण व्रणचिकित्सा पद्धतिः। जलौकः अशुद्धं रक्तं पिबति।**

## 27.3 कृषिविज्ञानम्

कृषेः महत्त्वं प्रतिपादयन् ऋग्वेदे उक्तम् – 'कृषिमित् कृषस्व' इति। अर्थात् कृषिः एव श्रेष्ठं कर्म। अतः कृषिः एव कार्या। कृषिविज्ञानक्षेत्रे चतुर्थशताब्द्यां महर्षिपराशरेण विरचितः "कृषिपराशरः" कृषिशास्त्रस्य विश्वकोषः कथयितुं शक्यते।

अस्मिन् ग्रन्थे कृषिविधिः सम्यक्रूपेण वर्णितः।

**अन्नस्य महत्त्वम्**

गीतायां भगवता श्रीकृष्णेन कथितम् –

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद् भवन्ति पर्जन्यो यज्ञः कर्मसमुद्भवः।। (गीता – 3–14)

कृषिपराशरे अपि अन्नस्य कृषेश्च महत्त्वं सम्यक् उपवर्णितम् –

अन्नं प्राणाः बलं चान्नमन्नं सर्वार्थसाधनम्।
देवासुरमनुष्याश्च सर्वे अन्नोपजीविनः।।
अन्नं हि धान्यं संजातं धान्यं कृष्या विना न च।
तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत्।।

वृष्टि–अनुमाने मेघानां महत्त्वम् – (कृषि पराशरः – 4.7)

कृषिविज्ञाने वृष्टेः महत्त्वं सर्वविदितम्। वृष्टेः अनुमाने मेघानां स्वरूपस्य परिज्ञानम् अत्यधिकं साहाय्यं भवति। संस्कृतवाङ्मये पयोदस्य चत्वारः भेदाः सलक्षणम् उपवर्णिताः–

आवर्तश्चैव संवर्तः पुष्करो द्रोण एव च।
चत्वारो जलदाः प्रोक्ता आवर्त्तादियथाक्रमम्।।





**वृष्टेः मात्रायाः ज्ञानम्**

वृष्टेः मात्रां ज्ञातुमपि प्रक्रियाः आसन्। जलाढकप्रक्रियया द्रोण–वृष्टिः = चत्वारः आढकाः = 6.4 सेण्टीमीटरमितम्।

कुत्र कियती वृष्टिः भवति इति वर्णयन् महर्षिः पराशरः कथयति –

समुद्रे दशाभागांश्च षड्भागानपि पर्वते।
पृथिव्यां चतुरो भागान् सदा वर्षति वासवः। (कृषिपराशरः, 29)
यदि कृषिव्यवस्था सम्यक् क्रियते तर्हि समृद्धिः प्रजायते।

**कृषिकार्ये जलबन्ध–जलसेचनादिव्यवस्था –**

महाभारते उल्लिखितं यत् तदानीन्तनैः जनैः आहारोत्पादनविषये अत्यधिकम् अवधानं दत्तम् आसीत्। तद्यथा –

क्षेत्रं हि रसवत् शुद्धं कर्षकेणोपपादितम्।
ऋते वर्षं न कौन्तेय जातु निर्वर्तयेत् फलम्।।
तत्र वै पौरुषं ब्रूयुः आसेकं यत्नकारितम्।
तत्र चापि ध्रुवं पश्येत् शोषणं दैवकारितम्।। (मभा. उद्योगपर्वणि–79)

उत्तमं रसवदपि क्षेत्रं वृष्ट्या विना फलं न ददाति। अतः यदा वृष्टिः न भवति तदा तत्र प्रयत्नेन आसेचनं कृत्वा जलव्यवस्था करणीया। तेन एतत् सिद्धं भवति यत् महाभारतयुगे वृष्टेः अभावकाले सस्यानां जलसेचनस्य कृतकेन विधानेन व्यवस्था क्रियते स्म।

महाभारते व्यासः सेतुम् (जलबन्धम्) उदाहरति –

मर्यादायां धर्मसेतुर्निबद्धो नैव सीदति।
पुष्टः स्रोत इवासक्तः स्फीतो भवति स×चयः।। (शान्तिपर्वणि–298)

यथा नद्यां सम्यक् निबद्धः सेतुः स्रोतसः वर्धनं करोति, तथा धर्मः अपि तपस्स×चयं विस्तारयति इति अस्य अभिप्रायः।

एतेन स्पष्टं भवति यत् महाभारतकाले अपि कृषिकार्यादिनिमित्तं जलबन्धाः तत्र तत्र निर्मीयन्ते स्म।

भृगुगर्गकश्यपादिमहर्षीणां ग्रन्थेषु अपि यत्र तत्र कृषिविज्ञानस्य सिद्धान्ताः दृश्यन्ते। आचार्यवराहमिहिरेणापि 'बृहत्संहिता'–इति ग्रन्थे कृषिविज्ञानस्य विविधानि तथ्यानि सम्यक्तया निरूपितानि सन्ति।

## 27.4 वास्तु–विज्ञानम्

'वास्तु' इत्यस्य अर्थः – वसन्ति प्राणिनो यत्र अथवा वसन्त्यत्र इति। गृहं विना गृहस्थस्य सर्वाः क्रियाः न सिध्यन्ति, अतः गृहादिनिर्माणस्य विज्ञानम् अत्यधिकं महत्त्वपूर्णं विद्यते।

प्राचीनभारते उत्कृष्टं वास्तुविज्ञानम् आसीत्। सिन्धुसभ्यताचित्राणि प्रायः सर्वान् आश्चर्यचकितान् कुर्वन्ति एव। तत्रत्या वास्तुविद्या अतिप्राचीना अत्युत्कृष्टा च। कर्णाटके बेलूरे विद्यमानः भूमिस्पर्शरहितः स्तम्भः, कोणार्क–क्षेत्रस्य सूर्यदेवालयः, श्रृंगेरीस्तम्भाः, अनन्तपुरीस्थाः सप्तस्वरप्रभवाः मण्डपाधाराः स्तम्भाः, अजन्ता–एल्लोरागुहाः, देहलीस्थः लोहस्तम्भः इत्यादयः भारतीयवास्तुविद्यायाः गरिमाणं प्रमाणीकुर्वन्ति। समराङ्गणसूत्रधारः, बृहत्संहिता, अर्थशास्त्रम्, मयमतम् मयसारः, मनुष्यालयचन्द्रिका, सुप्रभेदागमः, वास्तुरत्नावली, कामिकागमः, बहद्वास्तुमाला इत्यादिषु अनेकेषु ग्रन्थेषु वास्तुशास्त्रं निरूपितम् अस्ति।

मत्स्यपुराणे विख्यातानाम् अष्टादशवास्तुशास्त्रोपदेशकानां नामानि प्राप्यन्ते –

भृगुरत्रिवसिष्ठश्च विश्वकर्मा मयस्तथा।
नारदो नग्नजिच्चैव विशालाक्षपुरन्दरः।।
ब्रह्मा कुमारो नदीशः शौनको गर्ग एव च।
वासुदेवोऽग्निरुद्धश्च तथा शुक्रबृहस्पती।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः।। (मत्स्यपुराणम् 252/2–4)

बृहत्संहितायां मनु–वसिष्ठ–मय–नग्नजित् इत्यादिभिः आचार्यैः निर्मितानां प्रासादलक्षणानाम् उल्लेखः अद्यापि विद्यते। भोजस्य समराङ्गणसूत्रसारे सूर्योदयकालस्य महत्त्वं प्रतिपादितम्। तत्र उक्तं यत् गृहस्य अग्रे 'बृहद्वृक्षाः न भवेयुः – सूर्योद्भवा द्रुमच्छाया ध्वजच्छाया च गर्हिता। द्वारातिक्रमणादेताः क्षुद्व्याधिकलिकारकाः।।

## 27.5 विमानशास्त्रम्

वायुप्रवाहतः उत्पन्नम् ऊर्जं, सौरोर्जम्, इतरेन्धनोर्जं च उपयुज्य स×चार्यमाणानां विमानानां वर्णनं संस्कृतवाङ्मये यत्र तत्र प्राप्यते। भरद्वाजमहर्षेः (500 ई.पू.) यन्त्रसर्वस्वम्, यन्त्रार्णवम्, विमानशास्त्रम्, अंशबोधिनी, अगस्त्यमुनेः शक्तिसूत्रम्, ईश्वरस्य सौदामिनीकला, भरद्वाजस्यैव अंशुभतन्त्रं, शाकटायनस्य वायु–तत्त्वप्रकरणं वैश्वमारुततन्त्रं च, नारदस्य धूमप्रकरणम् इत्यादीनां विमानशास्त्रसम्बद्धानां ग्रन्थानाम् उल्लेखः दृश्यते। भोजस्य समराङ्गण–सूत्रधारं, शौनकमहर्षेः व्योमयानतन्त्रं, गर्गस्य यन्त्रकल्पः, नारायणस्य विमानचन्द्रिका, चक्रायनिमुनेः केतुयान–प्रदीपिका इत्यादयः अनेके ग्रन्थाः अपि विमानशास्त्रसम्बद्धाः एव।

विमानस्य अवरोहणकाले भूस्पर्शसमये चैव अपघातस्य सम्भावना अधिका भवति इति भरद्वाजमहर्षिः कथयति। अद्यापि सा एव स्थितिः वर्तते।

## पाठगतप्रश्नाः 27.2

रिक्तस्थानानि पूरयत

1. समराङ्गणसूत्रधारस्य रचनाकारः.................. वर्तते।

टिप्पणी

2. वराहमिहिरस्य प्रख्यातस्य ग्रन्थस्य नाम ............ अस्ति।
3. कृषिपराशरः .............. विषयस्य ग्रन्थः अस्ति।
4. कौटिल्यार्थशास्त्रम्................. विरचितम्।
5. आयुर्वेदस्य ओषधीनां गुणदोषवर्णनार्थं ................ अपि विरचिताः।
6. अष्टाङ्गहृदयम्................ विषयस्य ग्रन्थः।
7. मत्स्यपुराणे........................वास्तुविज्ञानिनां नामानि लिखितानि।
8. वसन्ति प्राणिनः यत्र इति............... उच्यते।
9. मेघानां...................... भेदाः कृषिपराशरे वर्णिताः।
10. गृहस्य अग्रे........................ न भवेयुः

## पाठगतप्रश्नाः 27.2

अधोलिखितप्रश्नानाम् उचितम् उत्तरं चिनुत

1. विमानशास्त्रस्य रचयिता कोऽस्ति ?
   (क) चरकः (ख) सुश्रुतः (ग) महर्षिभरद्वाजः (घ) गणेश दैवज्ञः।
2. यन्त्रसर्वस्वम् कस्य विषयस्य ग्रन्थोऽस्ति ?
   (क) आयुर्वेदस्य (ख) गणितस्य (ग) ज्योतिश्शास्त्रस्य (घ) विमानशास्त्रस्य।
3. निम्नलिखितेषु ग्रन्थेषु को ग्रन्थः भरद्वाजेन विरचितो नास्ति ?
   (क) यन्त्रसर्वस्वम् (ख) यन्त्रार्णवम् (ग) यन्त्रतन्त्रम् (घ) अंशुबोधिनी।
4. भरद्वाजस्य कः कालः वर्तते ?
   (क) 400 ई.पू. (ख) 500 ई.पू. (ग) 100 ई.पू. (घ) 200 ई.पू.
5. अंशुभतन्त्रम् कस्य रचना अस्ति ?
   (क) महर्षिभरद्वाजस्य (ख) महर्षिकण्वस्य (ग) महर्षि गौतमस्य (घ) महर्षिकपिलस्य।

---

## तृतीयः अंशः

## 27.6 पर्यावरणविज्ञानम्

संस्कृतवाङ्मये पर्यावरणविज्ञाने अपि पदे–पदे मार्गदर्शनं प्राप्यते। यत् परितः आवृणोति तद् एव पर्यावरणम् कथ्यते। अर्थात् प्रकृतिः एव पर्यावरणम्। पृथिवी, वायुः, जलम्, आकाशः, प्रकाशः, वनस्पतयः, पशुपक्षिणः, इत्यादयः पर्यावरणस्य प्रमुखानि अङ्गानि सन्ति। प्रकृतौ परिव्याप्तानि प×चमहाभूतानि मानवशरीरे अपि सन्निहितानि। अतः पर्यावरणसंरक्षणाय प्रकृतिमानवयोः पारस्परिकं सन्तुलनम् अनिवार्यम्। प्रकृतिः प्रतिक्षणं मानवस्य हितसम्पादने निरता। अतः मानवेन अपि सततं तस्याः स्वरूपं संरक्षणीयम्।

प्रदूषिते पर्यावरणे मानवजीवनस्य कल्पना अपि दुष्करा। अस्माकं वैदिकऋषिभिः प्राचीनमनीषिभिश्च एतानि तथ्यानि सम्यक् आत्मसात्कृतानि। तैः प्राकृतिकतत्त्वानां देवतारूपे पूजा कृता। पर्यावरणस्य परिष्करणाय यज्ञसंस्था च संस्थापिता।



27.4: **पर्यावरण प्रदूषणम्**

सम्प्रति संस्कतवाङ्मयतः कानिचित् उदाहरणानि प्राचीनभारतीयमनीषिणां पर्यावरणचेतनां प्रमाणीकुर्त्तुम् अत्र प्रस्तूयन्ते।

शुक्लयजुर्वेदे विश्वपर्यावरणस्य परिष्काराय ऋषयः प्रार्थयन्ति –

द्यौः शान्तिः। अन्तरिक्षं शान्तिः। पृथिवी शान्तिः।
आपः शान्तिः। ओषधयः शान्तिः। वनस्पतयः शान्तिः।
विश्वे देवाः शान्तिः। ब्रह्म शान्तिः। सर्वं शान्तिः।
शान्तिरेव शान्तिः। सा मा शान्तिरेधि।।

गीतायां भगवता कृष्णेन "अश्वत्थः सर्ववृक्षाणाम्" इति उक्त्वा अश्वत्थवृक्षस्य (पीपल) उत्कृष्टता प्रतिपादिता। अश्वत्थवृक्षस्य महत्त्वं न केवलं धार्मिकदृष्ट्या अपितु वैज्ञानिकदृष्ट्या अपि वर्तते। एषः वृक्षः सर्वाधिकं 'ऑक्सीजन' इत्यस्य उत्सर्जनं करोति।



27.5: **अश्वत्थः**

अग्निपुराणे कथितम् –

क्रियते पत्रविच्छेदः सपुष्पफलनिस्तपे।
अनावृष्टिभयं घोरं तस्मिन् देशे प्रजायते।।

अनेन कथनेन सिद्धयते यत् प्रकृतिं प्रति हिंसायाः दुष्परिणामः मानवस्य अकल्याणाय भवति।

प×चतन्त्रे उद्घोषितम् –

हिंसकान्यपि भूतानि यो हिनस्ति स निर्घृणः।
स याति नरकं घोरं...................................... ।

अर्थात् हिंसकानामपि प्राणिनां हिंसा दण्डनीया। सम्राट् अशोकः अपि आदिष्टवान् यत् पशूनां पक्षिणां च हननं दण्डार्हम्।

महाकविः कालिदासः अपि स्वकाव्येषु प्रकृतिमानवयोः मध्ये एकां विलक्षणां संवेदनशीलतां प्रस्तौति। अभिज्ञानशाकुन्तले कण्वऋषिः वृक्षादीन् सम्बोध्य वदति –

"भोः भोः संनिहितास्तपोवनतरवः।
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या।
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूति समये यस्याः भवत्युत्सवः।
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।"

विश्वसाहित्ये सर्वप्रथमं अथर्ववेदे ऋषिः भूमिं मातृपदे प्रतिष्ठाप्य आत्मानं पुत्रम् उद्घोषयति–

"माता भूमिः पुत्रोऽहं पृथिव्याः"
अत एव वेदाः कथयन्ति –
"शन्नो द्विपदो शन्नो चतुष्पदो"

परिष्कृतपर्यावरणे निवसतां भारतीयानां मानसिकपर्यावरणमपि स्वस्थम् आसीत्। अतः ते सर्वेषां कृते कल्याणम् अकामयन्।

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।।

## पाठगतप्रश्नाः 27.3

1. यत् परितः आवृणोति तत् किं कथ्यते?
2. वेद ऋषयः कस्य पूजकाः आसन्?
3. शुक्लयजुर्वेदे कस्य परिष्काराय प्रार्थना कृता?
4. गीतायां कृष्णेन वृक्षविषये किम् कथितम्?
5. सम्राट् अशोकः किम् आदिष्टवान्?
6. अथर्ववेदे ऋषिः भूमेः आत्मनश्च सम्बन्धविषये किं कथयति ?

## 27.7 किम् अधिगतम्

- संस्कृत–वाङ्मये प्रभूतं वैज्ञानिकं साहित्यं वर्तते।
- गणितशास्त्रे आर्यभटस्य योगदानं महत्त्वपूर्णम्।
- शून्यस्य अवधारणा, दशमाङ्कपद्धतिः दशमलव–प्रणाली, π (पाइ) इत्यस्य मूल्यनिर्धारणं संख्या विज्ञानम् इत्यादीनां अन्वेषणं संस्कृतवाङ्मयस्य प्रमुखम् अवदानम्।
- ज्योतिश्शास्त्रे भास्कराचार्यस्य सिद्धान्त–शिरोमणिः प्रसिद्धः ग्रन्थः वर्तते। लीलावती अस्य एव भागः विद्यते।
- आयुर्वेदे आचार्यचरकस्य चरकसंहिता, आचार्य–सुश्रुतस्य सुश्रुतसंहिता च महत्त्वपूर्णौ ग्रन्थौ। सुश्रुतः प्रथमः त्वक्प्रत्यारोपणविशेषज्ञः।
- कृषिविज्ञाने पराशरस्य कृषिपराशरः कृषिविषये विश्वकोषः एव।
- वास्तुविज्ञानस्य अष्टादशविशेषणानि मत्स्यपुराणे परिगणितानि। बृहत्संहितायां प्रासादनिर्माणकला विस्तरेण वर्णिता।
- महर्षिभरद्वाजविरचिते यन्त्रसर्वस्वे विमानविषये महत्त्वपूर्णाः आविष्काराः प्रदत्ताः।
- संस्कृतवाङ्मये पर्यावरणसंरक्षणस्य सिद्धान्ताः पदे पदे प्राप्यन्ते। पर्यावरणसंरक्षणाय प्रकृतिमानवयोः पारस्परिकं सन्तुलनम् अनिवार्यम्। प्रकृतिः प्रतिक्षणं मानवस्य हितसम्पादने निरता, मानवेनापि सदैव पर्यावरणस्य रक्षणं करणीयम्।

## 27.8 पाठान्तप्रश्नाः

1. आर्यभटस्य योगदानं चतुर्षु वाक्येषु वर्णयत।
2. आयुर्वेदस्य प×चानां ग्रन्थानां नामानि लिखित्वा तेषां वैशिष्ट्यं वर्णयत।
3. कृषिविज्ञानस्य महत्त्वं प×चवाक्येषु वर्णयत।
4. दशवास्तुशास्त्रोपदेशकानां नामानि लिखत।
5. केषाि×चत् दशविमानशास्त्रसम्बद्धानां ग्रन्थानां नामानि तेषां लेखकानामपि नामानि लिखत।
6. संस्कृत–वाङ्मये कुत्र–कुत्र पर्यावरणसंरक्षणस्य सङ्केताः प्राप्यन्ते?
7. पर्यावरणस्य संरक्षणाय भवान् किं किं करिष्यति, षड्वाक्येषु लिखत।

## 27.9 उत्तराणि

**पाठगतप्रश्नाः**

**27.1** 1. 476 तमे वर्षे 2. आर्यभटीयम् 3. 3.1416

4. लम्ब $^2$ + आधार $^2$ = कर्ण $^2$ 5. भास्कराचार्येण 6. समुद्रम्

7. बृहद्–जातकम्, प×चसिद्धान्तिका, बृहद्यात्रा, बृहद्–संहिता च।

**27.2 क** 1. भोजः 2. बृहद्–संहिता 3. कृषि–विषयस्य

4. कौटिल्येन 5. निघण्टुग्रन्थाः 6. रसायनतन्त्रम् इति/आयुर्वेदः

7. अष्टादश 8. वास्तु 9. चत्वारः 10. बृहद्वृक्षाः

**27.2 ख** 1. (ग) महर्षि भरद्वाजः 2. (घ) विमानशास्त्रस्य 3. (ग) यन्त्रतन्त्रम्

4. (ख) 500 ई. पू. 5. (क) महर्षिभरद्वाजस्य

**27.3** 1. पर्यावरणम् 2. प्रकृतेः 3. विश्वपर्यावरणस्य

4. 'अश्वत्थः सर्ववृक्षाणाम्' 5. पशूनां पक्षिणां च हननं दण्डार्हम्।

6. "माता भूमिः पुत्रोऽहं पृथिव्याः।"

**27.8 पाठान्तप्रश्नाः**

सङ्केताः

1. आर्यभटस्य गणितज्योतिर्विज्ञानक्षेत्रे महत्त्वपूर्णं योगदानं वर्तते। तेन सर्वप्रथमं वृत्तस्य परिधिव्यासयोः अनुपातस्य च(पाइ) इत्यस्य मूल्यं 3.1416 इति निर्धारितम्। तेन 'पृथिवी सूर्यं परितः परिभ्रमति' इति साधितम्। 'सूर्यादीनां स×चारः भ्रममूलः' "ग्रहाणां स्वप्रकाशता नास्ति' इत्यादयः बहवः वैज्ञानिकसिद्धान्ताः अपि आर्यभटेन एव प्रतिपादिताः।

2. (1) चरकसंहिता – अस्मिन् सर्वेषां विषयानां प्रतिपादनं कृतम्।

   (2) सुश्रुतसंहिता – अस्मिन् शल्यचिकित्सा वर्णिता।

   (3) अष्टाङ्गहृदयम् – अस्मिन् ग्रन्थे रसायनतन्त्रस्य वर्णनं विशेषरूपेण उपलभ्यते।

   (4) भावप्रकाशः – अस्मिन् ग्रन्थे सर्वेषाम् अङ्गानां चिकित्सायाः वर्णनं विद्यते।

   (5) धन्वन्तरिनिघण्टुः – अस्मिन् आयुर्वेदस्य ओषधीनां गुणदोषवर्णनं कृतम्।

3. कृषिविज्ञानस्य महत्त्वम् – कृषिविज्ञानस्य साहाय्येन प्रभूतम् उत्कृष्टं च अन्नम् उत्पादयितुं शक्यते। 'अन्नं सर्वार्थसाधनम्' इति उक्तं कृषिपराशरे। अन्नं विना जीवनं नास्ति। अतः कस्यापि राष्ट्रस्य समृद्धिः कृषिविज्ञाने निर्भरा।

4. 1. भृगुः 2. अत्रिः 3. वसिष्ठः 4. विश्वकर्मा 5. मयः 6. नारदः 7. नग्नजित् 8. विशालाक्षः 9. पुरन्दरः 10. ब्रह्मा

5.

| ग्रन्थाः | | लेखकाः |
|---|---|---|
| (1) यन्त्रसर्वस्वम् | – | महर्षिः भरद्वाजः |
| (2) यन्त्रार्णवम् | – | महर्षिः भरद्वाजः |
| (3) शक्तिसूत्रम् | – | अगस्त्यः |
| (4) सौदामिनी कला | – | ईश्वरः |
| (5) वायुतत्त्वप्रकरणम् | – | शाकटायनः |
| (6) धूमप्रकरणम् | – | नारदः |





(7) व्योमयानतन्त्रम् – रौनकः
(8) यन्त्रकल्पम् – गर्गः
(9) विमानचन्द्रिका – नारायणः
(9) केतुयान प्रदीपिका – चक्रायनिमुनिः

6. शुक्लयजुर्वेदे, गीतायाम्, अग्निपुराणे, प×चतन्त्रे, अभिज्ञानशाकुन्तले, अथर्ववेदे च पर्यावरण संरक्षणस्य सङ्केताः प्राप्यन्ते।

7. स्वयं कुर्वन्तु।

28

# संस्कृतम् अन्याः भारतीयाः भाषाः च

भाषा अस्माकं विचारविनिमयस्य सशक्तं साधनम् अस्ति। अस्याः मानवजीवनेन सह घनिष्ठः सम्बन्धः विद्यते। मानवः यन्मनसा ध्यायति तद्वाचा वदति। सर्वे जानन्ति यदस्माकं विशाले भारतदेशे विभिन्नप्रान्तवासिनो जनाः स्वप्रान्तीयभाषाणां प्रयोगं कुर्वन्ति। असमवासिनः असमिया भाषां, बंगालवासिनः बाङ्लाभाषां, तमिलनाडुवासिनः तमिलभाषां, हिन्दीप्रदेशवासिनः हिन्दीभाषां भाषन्ते। इत्थम् अनेकासां भाषाणां भाषिणो जनाः अत्र निवसन्ति। संस्कृतम् भारतस्य सर्वासां भाषाणां जननी अस्ति। तस्याः सम्बंधः भारतस्य सर्वाभिः भाषाभिः सह वर्तते। संस्कृतम् सर्वाः भारतीयभाषाः योजयति, संवर्धयति च।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- संस्कृतमूलकानां भारतीयभाषाणां तालिकां निर्मास्यति;
- संस्कृतभाषया सह अन्य–भारतीयभाषाणां मूलशब्देषु साम्यं स्थापयिष्यति;
- भारतीयभाषाणां संस्कृतभाषया सह साम्यं विज्ञाय द्वयोः सम्बन्धं स्पष्टीकरिष्यति;
- समकालीनभारतीयसाहित्ये संस्कृतस्य प्रभावं दर्शयन् उदाहरणानि लेखिष्यति;
- भारतीयसंविधानस्य अष्टम–अनुसूच्यां परिगणितभाषाणां नामानि लेखिष्यति;
- संविधाने संस्कृताय प्रदत्तं महत्त्वम् निरूपयिष्यति।







## क्रियाकलापः

निम्नलिखितस्तंभयोः 'क' स्तंभे विभिन्नभाषायाः कवीनां नामानि सन्ति, 'ख' स्तंभे च ग्रंथानां नामानि सन्ति। कः ग्रन्थः मूलरूपेण कस्यां भाषायां वर्तते इति भवान् 'ग' स्तंभे लिखतु।

| 'क' | 'ख' | 'ग' |
|---|---|---|
| वाल्मीकिः | रामायणम् | .................................. |
| जयशंकरप्रसादः | कामायनी | .................................. |
| महर्षिवेदव्यासः | महाभारतम् | .................................. |
| शेक्सपियरः | ओथेलो | .................................. |
| रवीन्द्रनाथटैगोरः | गीतांजलिः | .................................. |
| तिरुवल्लुवरः | तिरुक्कुरुल | .................................. |
| तुलसीदासः | रामचरितमानसः | .................................. |
| विद्यापतिः | पदावली | .................................. |



## 28.1 अधुना अवगच्छामः

### प्रथमः अंशः

भाषाविदां मते संसारे षण्णवत्यधिकद्विसहस्र–सप्तशत संख्याकाः (2796) भाषाः सन्ति। संस्कृतभाषा भारोपीयभाषासु गण्यते।

तस्य कारंण किम्? शब्दानां साम्यम्, व्याकरणस्य साम्यम्, ध्वनीनां साम्यम्–एभिः त्रिभिः कारणैः तत्र अनेकासां भाषाणां समावेशः जातः




संस्कृतम् विश्वस्य प्राचीनतमा आर्यभाषा अस्ति। संस्कृतस्य द्वे रूपे स्तः– वैदिकं लौकिक×च। संस्कृतस्य वैदिकं रूपं प्राचीनतमम्। तद्रूपं वयं ऋग्वेदे प्राप्नुमः। भवद्भिः अपि प्रथमस्वाध्यायसोपाने वैदिकवाङ्मयस्य पाठः पठितः, ज्ञातं च तद्रूपम्।

संस्कृतस्य लौकिकं रूपं वाल्मीकिरामायणम् इति ग्रंथात् प्रारभते। लौकिकसंस्कृतम् प्रसिद्धेन वैयाकरणेन पाणिनिना व्याकरणनियमैः आबध्य नियंत्रितं कृतम्। अद्यत्वे लौकिकसंस्कृतभाषायाः व्याकरणनियमबद्धं रूपमेव सर्वत्र दृश्यते। संस्कृतभाषा व्याकरणनियमबद्धतया अन्यासां भारतीयभाषाणाम् अनुशासिका भूत्वा मार्गदर्शनं करोति।

तासां साहित्यम्, शब्दभण्डारः, वर्णनरीतयः संस्कृतेन प्रभाविताः सन्ति। संस्कृतस्य प्रभावेण अन्यासु भाषासु ध्वनिस्तरे, रूपस्तरे, वाक्यस्तरे अर्थस्तरे च परिवर्तनं भवति। तेन संस्कृतस्य वैज्ञानिकता स्पष्टीभवति।

सूचनाप्रौद्योगिकीप्रधाने युगेऽस्मिन् संगणकयंत्रस्य कृते संस्कृतभाषा अत्यन्तं महत्त्वपूर्णम् वैज्ञानिक×च जातम्। यतः संस्कृतवाक्येषु शब्दानां विभक्तियुक्तं संश्लिष्टरूपं संगणकयंत्राय श्रेष्ठं सिद्धमस्ति।

प्राचीनशिलालेखेषु बहवः अभिलेखाः संस्कृतभाषायाम् एव उत्कीर्णाः सन्ति। तत्र कारणं किम्? बहुकालपर्यन्तं भारतस्य राज्येषु संस्कृतस्य प्रयोगः राजभाषारूपेण प्राचलत्। ज्योतिष्–गणितविषयेषु बीजगणित–ज्यामितिकग्रंथाः संस्कृतभाषायां सन्ति येषां विषये भवद्भिः मुख्यपाठ्यपुस्तके पठितमेव।

**पालि–प्राकृत–अपभ्रंशानाम् उद्भवः**

अनन्तरं संस्कृतस्य आधारं गृहीत्वा पालिभाषा विकसिता स×जाता। बौद्धधर्मस्य ग्रन्थाः जातकग्रंथाः इति नाम्ना प्रसिद्धाः पालिभाषायां रचिताः आसन्। एषु ग्रंथेषु जातकमाला इति ग्रंथः प्रसिद्धः अस्ति। जातकमालायां महात्मनो बुद्धस्य पूर्वजन्मनः कथाः संगृहीताः सन्ति।

पालिभाषानन्तरम् प्राकृतभाषायाः उद्भवः स×जातः। अशोकस्य शिलालेखेषु प्राकृतभाषायाः प्रयोगः उपलभ्यते। प्राकृतभाषायाः प्रयोगः अश्वघोषस्य नाटकेषु प्राप्यते। प्राकृतभाषा अपि शनै शनैः व्याकरणनियमेषु आबद्धा। प्राकृतस्य व्याकरणरचयितारौ हेमचंद्रः बररुचिः च आस्ताम्। लोकव्यवहारकारणात् तत्र किमपि परिवर्तनं जातम्। पश्चात् सा सरला लोकभाषा जाता, यस्याः लोकव्यवहारे प्रयोगो भवति।

प्राकृतभाषायां यदा व्याकरणविरुद्धप्रयोगाणां प्रचलनं जातं तदा तस्याम् अपभ्रंशानां प्रयोगः अधिकतया अभवत्। अपभ्रंशभाषाऽपि कालान्तरे व्याकरणनियमैः आबद्धा।

अपभ्रंशस्य शौरसेनी मागधी अर्धमागधी, महाराष्ट्री, पैशाची ब्राचड इति षड्भेदाः सन्ति। आधुनिकभारतीयभाषाणाम् उद्भवः एताभ्यः अपभ्रंशभाषाभ्यः एव मन्यते।

आधुनिकभारतीयभाषासु हिन्दी–ब्रजभाषा–गुजराती–राजस्थानी–हरियाणवी–पंजाबी–कन्नौजी–अवधी–हिमाचली–कश्मीरी डोगरी–पहाड़ी एतासां भाषाणाम् उद्भवः शौरसेनी–अपभ्रंशात् संजातः।

मागधी–अपभ्रंशात् बिहारी–बाङ्गला–असमी–उड़िया–मैथिली–मगही–भोजपुरी–संथाली–बघेली–छत्तीसगढ़ी–नेपाली–मणिपुरी–बोडो इत्यादयः भाषाः समुद्भूताः।

महाराष्ट्री–अपभ्रंशात् उद्भूताः भाषाः सन्ति, मराठी–कोंकणी इति। पैशाची–अपभ्रंशात् लहंदा (पश्चिमी पंजाबी), ब्राचड़ अपभ्रंशात् च सिंधी भाषा उद्भूता।



टिप्पणी

एतासु सर्वासु भाषासु संस्कृतस्य महान् प्रभावः विद्यते। तासु संस्कृतशब्दानां प्रयोगः बहुलतया वर्तते। कतिपयाः शब्दाः अत्र दीयन्ते।

द्रविडभाषापरिवारस्य तमिल–तेलुगु–कन्नड–मलयालम आदिभाषाणाम् आर्यपरिवारस्य भाषया सह मुख्यतया संस्कृतेन सह बहुशताब्देभ्यः सम्पर्कः विद्यते। मलयालम तु संस्कृतशब्दबहुला एव अस्ति।

| संस्कृतम् | हिन्दी | अंग्रेजी | फारसी | जर्मन |
|---|---|---|---|---|
| पितृ | पिता | फादर | पेदर | – |
| मातृ | माता | मदर | मादर | – |
| त्रि | तीन | थ्री | – | द्राई |
| दुहितृ | दुहिता (बेटी) | डॉक्टर | दुख्तर | तोखतर |

| संस्कृतम् | तमिल | मलयालम | तेलुगु |
|---|---|---|---|
| अभिनयः | अविनयम् | अविनयम् | अभिनयमु |
| निश्चयः | निच्चयम् | निश्चयम् | निश्चयमु |

**भारतीयभाषासु संस्कृतशब्दाः**

निम्नलिखिताः संस्कृतशब्दाः तमिल–तेलुगु–कन्नड–मलयालम–बाङ्गला–उडिया–हिन्दी–गुजराती–मराठी–मैथिली–असमिया आदिभाषासु प्रायः किंचिद्रूपभेदेन अथवा यथावत् प्रयुक्ताः भवन्ति।

अंशः, अपमानम्, अंगुलिः, अनुभवः, कायः, ग्रामः, विश्वासः, वृक्षः, शापः, शोकः, श्वासः, रक्तम्, अन्नम्, परलोकः, विवादः, जीवनम्, गानम्, मूलम्, अवस्था, इच्छा, लज्जा, प्रतिनिधि, पत्नी, शिशुः, ज्ञानी, परस्परं, नूतनं। हिन्दीभाषायां संस्कृतस्य तत्समशब्दानां तद्भवरूपस्य च प्रयोगः दृश्यते। यथा– आश्चर्यम् (अचरज), काष्ठ (काठ), कर्ण (कान), उष्ट्र (ऊँट), अग्नि (आग), उच्च (ऊँचा)।

**भारतीयसंविधाने संस्कृतस्य स्थानम्**

स्वतंत्रताप्राप्तेः अनन्तरं भारतसर्वकारेण स्वीयं संविधानं निर्मितम्। तत्र प्रमुखसंपर्कभाषारूपेण हिन्दीभाषायै 'राजभाषा' इति उक्त्वा मान्यता प्रदत्ता। राजभाषायाः हिन्द्याः समृद्धयर्थं संस्कृतस्य सहायता ग्रहीतव्या इत्यपि संविधाने निर्दिष्टम् अस्ति।

संविधानस्य अष्टम–अनुसूच्यां सर्वकारेण द्वाविंशतिसंख्याकानां भाषाणां विभिन्नराज्येभ्यः परिगणनं विधाय मान्यता प्रदत्ता। ताः सन्ति एताः भाषाः–असमिया, उड़िया, उर्दू, कन्नड, कश्मीरी, गुजराती, तमिल, तेलुगु, पंजाबी, बंगाली बोडो, मराठी, मलयालम, मैथिली, संस्कृतं, संथाली, सिंधी, हिन्दी, नेपाली, कोंकणी, मणिपुरी, डोगरी।

एताः भाषाः भारतस्य विभिन्नेषु भागेषु भाष्यन्ते। भवतां क्षेत्रे का भाषा भाष्यते? अन्येषु क्षेत्रेषु च काः भाषाः प्रचलन्ति इति तासां विषये अवबोधन्तु।

## पाठगतप्रश्नाः 28.1

1. संस्कृतम् इति शब्दस्य कः अर्थः भवति?
2. भाषाणां शब्दभण्डारः वर्णनरीतयः केन प्रभाविताः सन्ति?
3. अपभ्रंशस्य के षड्भेदाः सन्ति?
4. शौरसेनी–अपभ्रंशात् कासां भाषाणाम् उद्भवः संजातः?
5. आधुनिकभारतीयभाषाणाम् उद्भवः कस्मात् अपभ्रंशात् संजातः?
6. द्रविडभाषापरिवारस्य काः भाषाः सन्ति?
7. भारतीयसंविधाने प्रमुखसंपर्कभाषारूपेण कस्यै भाषायै मान्यता प्राप्ता?

## द्वितीयः अंशः

### वर्णानाम् उच्चारणम्

ध्वनीनाम् उच्चारणाय जिह्वया सह मुख्यरूपेण अष्ट अंगानि प्रयुज्यन्ते। तानि सन्ति हृदयं, कंठः, तालुः, मूर्धा, दन्ताः, जिह्वामूलम्, नासिका, ओष्ठौ। एतानि उच्चारणस्थानानि चित्रे ध्यानेन पश्यन्तु। स्वयम् 'ट त' वर्णयोः उच्चारणकाले पश्यन्तु यत् जिह्वा कस्य कस्य मुखावयवस्य सहायतां गृह्णाति।

**प्रयत्नः**

वर्णानाम् उच्चारणे मुखस्य अंगानां प्रयत्नः भवति। स प्रयत्नः द्विप्रकारेण क्रियते आभ्यन्तर (आन्तरिक) रूपेण, बाह्यरूपेण च।

(क) आभ्यन्तरप्रयत्नेन उच्चारितानां वर्णानां प×च भेदाः सन्ति (i) स्पृष्टम् (ii) ईषत्स्पृष्टम् (iii) ईषद्विवृतम् (iv) विवृतम् (v) संवृतम्।

(ख) बाह्यप्रयत्नेन उच्चारितानां वर्णानाम् एकादश भेदाः सन्ति–

(i) विवारः
(ii) संवारः
(iii) श्वासः
(iv) नादः
(v) घोषः
(vi) अघोषः
(vii) अल्पप्राणः
(viii) महाप्राणः
(ix) उदात्तः
(x) अनुदात्तः
(xi) स्वरितश्च।

अधुना अधोलिखिततालिकां पश्यतु–

### उच्चारण–अवयव




28.1

### उच्चारणस्थानानि

**वर्णाः**

| **स्वराः** | **व्य×जनानि** | |
|---|---|---|
| अ | क् ख् ग् घ् ङ्, ह् विसर्ग (:) | कण्ठः |
| इ | च्, छ्, ज्, झ्, ञ्, य्, श् | तालु |
| ऋ | ट्, ठ्, ड्, ढ् ण् र् ष् | मूर्धा |
| लृ | त् थ् द् ध् न् ल् स् | दन्ताः |
| उ | प् फ् ब् भ् म् उपध्मानीयः (× प × फ) | ओष्ठ |
| | ङ्, ञ् ण् न् म्, अनुस्वारः (.) | नासिका अपि |
| ए ऐ | | कण्ठ–तालु |
| ओ औ | | कण्ठ–ओष्ठम् |
| व | | दन्त–ओष्ठम् |
| | जिह्वामूलीयः (× क × ख) | जिह्वामूलम् |

संस्कृतध्वनीनाम् उच्चारणे उच्चारणावयवानाम् आभ्यन्तरबाह्य प्रयत्नैः उपयोगः क्रियते। इत्थं ध्वनीनाम् उच्चारणेऽपि वैज्ञानिकता वर्तते।



टिप्पणी

| (क) आभ्यन्तरप्रयत्नाः | | स्पृष्टम् वर्णाः | | ईषत् स्पृष्टम् | ईषद्विवृतम् | विवृतम् | संवृतम् |
|---|---|---|---|---|---|---|---|
| | संज्ञा | स्पर्शाः | | अन्तःस्थः | ऊष्माः | स्वराः | |
| | क ख | ग ङ | घ | य | श | अ इ उ ऋ | ह्रस्व |
| | च छ | ज ञ | झ | र | ष | लृ ए ओ ऐ | 'अ' |
| | ट ठ | ड ण | ढ | ल | स | औ | |
| | त थ | द न | ध | व | ह | | |
| | प फ | ब म | भ | | | | |

(ख) **बाह्यप्रयत्नाः**

अल्पप्राणाः– वर्गीयाः 1, 3, 5 वर्णाः (यथा क्, ग्, ङ), य् र् ल् व्

महाप्राणाः – वर्गीयाः 2, 4 वर्णाः, (यथा ख, घ), श् ष् स् ह

## क्रियाकलापः

अधोलिखितवर्णानाम् उच्चारणं कुर्वन्तु–

**दन्ताः** त — पश्यन्तु, जिह्वा मुखे कं स्थानं स्पृशति? (दन्तान्)

**ओष्ठौ** प — मुखे कयोः अंगयोः मेलनेन अस्य उच्चारणं भवति? (ओष्ठयोः)

**कण्ठः** क — जिह्वा कुत्र स्पर्शं करोति? नूनं कुत्रापि न। यतः अस्य उच्चारणस्थानं कण्ठः अस्ति।

**तालुः** च — जिह्वा कुत्र स्पर्शं करोति? दन्तानाम् उपरितालुस्थानम्।

**मूर्धा** ट — जिह्वा कुत्र स्पर्शं करोति? (मुखे सर्वोन्नतस्थानं मूर्धानम्)

## पाठगतप्रश्नाः 28.2

1. प्रयत्नः कः कथ्यते?
2. ध्वनीनाम् उच्चारणाय मुख्यरूपेण कानि अंगानि प्रयुज्यन्ते?
3. स्पर्शसंज्ञकाः वर्णाः के सन्ति?
4. मूर्धया उच्चारिताः वर्णाः के कथ्यन्ते?
5. एतेषु नासिकया उच्चार्यमाणा ध्वनयः के–

   ग्, ट्, न्, य्, ङ्, ण्, ब्, म्, ञ्

## तृतीयः अंशः

भाषायाः शब्देषु विभिन्नकारणात् अर्थपरिवर्तनं जायते, तदस्मिन् अंशे वयं बोधामः

### अर्थस्तरे परिवर्तनम्

शब्दानाम् अर्थः सर्वदा समानः न भवति। कदाचित् शब्दानाम् उच्चारणे ध्वनौ बलप्रभावेण, कदाचित् भौगोलिकवातावरणे परिवर्तनकारणेन, कदाचित् नवीनवस्तूनां निर्माणेन, कदाचित् नम्रताप्रदर्शनेन, अधिकशब्दस्थाने एकशब्दस्य प्रयोगेण, पुनरावृत्त्या, शब्दस्य इतरभाषायां प्रयोगेण व्यंग्येन, अलंकारिकप्रयोगेण च एतैः कारणैः अर्थस्तरे शब्देषु परिवर्तनं भवति।

अधुना उदाहरणानि पश्यन्तु यत् शब्दानाम् अर्थे कथं परिवर्तनं जायते। यथा– ग्रामीणः इति शब्दः ग्रामस्य वासी इत्यर्थं द्योतयति। शनैः शनैः अस्य अर्थः परिवर्तितो भूत्वा 'असंस्कृत' असभ्यः इति जातः। एवं तैलस्य मौलिकः अर्थः तिलस्य रसः भवति किन्तु शनैः शनैः अधुना तैलस्य अर्थः परिवर्तितो भूत्वा सर्षपस्य, मत्स्यस्य नारिकेलस्य, मृत्तिकायाश्च अपि तैलं भवति। एवमेव– मृगः इत्यस्य अर्थः पशुः आसीत् अधुना हिन्द्यां मृगः इति हरिण इत्यर्थे प्रयुजयते।

एतादृशाः बहवः शब्दाः सन्ति येषाम् अद्यत्वे भिन्नेऽर्थे प्रयोगः भवति। एतादृशान् शब्दान् चित्वा लिखन्तु। शब्दस्तरे अर्थपरिवर्तनं त्रिभिः प्रकारैः भवति।

(i) अर्थविस्तारेण (ii) अर्थसंकोचेन (iii) अर्थादेशेन च।

अधुना क्रमशः उदाहरणेन बोधामः।

(i) अर्थविस्तरः– संस्कृतस्य 'परश्वः' शब्दः केवलं आगामिपरश्वः कृते अस्ति किन्तु तस्मादेव विकसितः हिन्द्यां परसों शब्दः गतदिवस्य आगामिदिनस्य च द्वाभ्यां कृते भवति। 'विभीषणः' 'नारदः' इति द्वौ शब्दौ अपि स्वम् अर्थं विस्तृतं कृत्वा गृहस्य भेदकः मतभेदकारकः इत्यर्थे स्तः।

(ii) अर्थसंकोचः– भार्याशब्दः यस्याः भरणपोषणं भवेत् इत्यर्थे प्रयुज्यते स्म। किन्तु अद्यत्वे अयंशब्दः केवलं पत्नी इत्यर्थे अर्थसंकोचेन प्रयुज्यते।

(iii) अर्थादेशः– शब्दस्य प्रधान–अर्थेन सह कदाचित् भावसाहचर्येण अन्यः गौणः अर्थः अपि भवति। यथा– मौन शब्दः मुनि इत्यनेन निर्मितः, यस्य प्रयोगः प्रारंभे मुनीनां विरुद्धाय आचरणाय भवति स्म। परन्तु शनैः शनैः अर्थपरिवर्तनेन मौनम् इति 'निःशब्दता' कृते प्रयुक्तः भवति।

### रूपस्तरे परिवर्तनम्

भाषायां रूपस्य (पदस्य) रचना द्वाभ्यां भवति– प्रथमं प्रातिपादिकेन। द्वितीयं– धातुना।

बालक, पुस्तक, चल्, पठ्, इत्यादीनि मूलरूपे सन्ति।

यत्र शब्दे सुबादिप्रत्ययाः योज्यन्ते ते सुबन्तपदानि भवन्ति। यथा बालक इत्यनेन बालकः, पुस्तक इत्यनेन पुस्तकम् भवति। एवमेव चल् पठ् इत्यादिधातुषु तिङादिप्रत्यययोगेन चलति, पठति इत्यादि रूपं भवति। इत्थम् शब्दानाम् मूलरूपे संबंधतत्त्वं सुप्तिङादिप्रत्ययं संयोज्य रूपस्तरे परिवर्तनं भवति। अतः 'सुप्तिङन्तं पदम्' इति उच्यते।

एवमेव अधोनिर्दिष्टानि कानिचित् उदाहरणानि पश्यन्तु यत्र संबंधतत्त्वं संयोज्य रूपपरिवर्तनं जातम्।

संस्कृते– छात्राः विद्यालयम् गच्छन्ति।

(छात्र + आः, विद्यालय + अम्, गच्छ् + अन्ति)

छात्राः विद्यालयम् गतवन्तः (गम् + क्तवतु अत्)

सर्व + उत्तमः = सर्वोत्तमः (अत्र अ + उ इत्यस्य संधिना 'ओ' इति रूपपरिवर्तनं संजातम्।

## पाठगतप्रश्नाः 28.3

1. शब्दस्तरे अर्थपरिवर्तनं कतिधा भवति?
2. तैलम् इति शब्दस्य अद्यत्वे के के अर्थाः सन्ति?
3. (क) अधोलिखितेषु शब्देषु मूलशब्दान् लिखन्तु

    बालकाः, पुस्तकम्, पुष्पाणि, वृक्षेषु, नदीनाम्

    (ख) अधोलिखितेषु तिङन्तरूपेषु मूलधातवः के?

    पठन्ति, लेखिष्यति, गच्छतु, शृणोति, अखादत्

    (ग) अधोलिखितेषु सुबन्तानि तिङन्तानि च पृथक् कुर्वन्तु

    विद्यालयम्, बालकेन, लिखामि, वाटिकाम्, पश्यन्ति, अधावत्, गुरवः, गमिष्यति

---

## चतुर्थः अंशः

### भाषायाः लिखितरूपम्–लिपिविकासश्च

अनेकसहस्रवर्षपर्यन्तम् आर्यभाषाः मौखिकपरंपरायामेव प्रचलिताः आसन्। श्रवणेन एव

शास्त्राणां ज्ञानं भवति स्म। अतएव वेदाः 'श्रुतयः' इति कथ्यन्ते। शनैः शनैः वैज्ञानिक विकासेन तकनीकिप्रगत्या च तासां लिखितरूपं विकसितम् अभूत्।

लिपेः भाषायाः च परस्परं घनिष्ठः सम्बंधः अस्ति। या भाषा मूलरूपे ध्वनिषु आश्रिता, ते ध्वनयः लिप्यां रेखाभिः व्यक्ताः क्रियन्ते।

टिप्पणी

### लिपीनां विकासक्रमः

ऐतिहासिकदृष्ट्या लिपीनां विकासक्रमे चित्रात्मकलिपिः (यथा चीनीभाषायाम्) भावसंकेतलिपिः, वर्णात्मकलिपिः, अक्षरात्मकलिपिः, एतासां नामानि प्राप्यन्ते। क्रमशः विकसमानाभिः एताभिः लिपिभिः लेखनकलायाम् उत्तरोत्तरं विकासः अभवत्। लिपिम् अधिकं सुन्दरं विधातुम् अन्यासां लिपीनाम् अपि अन्वेषणम् अभवत्। तासां नामानि अपि बोधन्तु। ताः सन्ति ब्राह्मीलिपिः, खरोष्ठीलिपिः, गुप्तलिपिः, कुटिललिपिः, शारदालिपिः च।

अपि जानन्ति भवन्तः यस्याः लिपेः वयं संस्कृतभाषायां हिन्दीभाषायां च प्रयोगं कुर्मः तस्या लिपेः नाम किमस्ति? सा लिपिः अस्ति **देवनागरी लिपिः**।

देवनागरीलिपेः वर्तमानरूपस्य विकासः दशमतः द्वादशशताब्दपर्यन्तम् अभूत्। प्रायः भारतीयभाषासु अधिकतमाः भाषाः यथा संस्कृत पालि प्राकृत–अपभ्रंश–हिन्दी–मराठी–गुजराती– नेपाली–सिंधी, प्रमुखाः तु अद्यत्वे देवनागरीलिप्यामेव लिख्यन्ते।

भारतीयभाषातिरिक्तं विश्वस्य अनेकासु भाषासु अस्याः लिपेः प्रयोगं कर्तुं शक्यते। देवनागरीलिपेः इयं विशेषता अस्ति यत् अस्यां यादृक् लिख्यते तादृगेव पठयते। अतः कथमपि पठने वाचने वा काठिन्यं न भवति। इयं लिपिः अधुनापर्यन्तम् एकस्मिन् रूपे एव प्रचलिता वर्तते। इयम् आक्षरिका अस्ति।

### देवनागरीलिपेः वैशिष्टयम्

देवनागरीलिपिः विश्वस्य सर्वासु लिपिषु अधिकं वैज्ञानिकम् अस्ति। तत्र सन्ति एतानि कारणानि–

(i) इयं भाषाणाम् अधिकाधिकध्वनिचिह्नैः (वर्णैः) सम्पन्ना अस्ति।

(ii) अस्यां वर्णमालायां स्वराणां व्यंजना×च वर्गीकरणम् उच्चारणस्थानानां प्रयत्नाना×च आधारे कृतम् अस्ति।

(iii) प्रत्येकं स्वरवर्णाय मात्राचिह्नानि निश्चितानि सन्ति, येषां प्रयोगेण स्वरयुक्तव्यंजनानि उच्चारणानुरूपमेव स्वतंत्रेषु अक्षरेषु लिपिबद्धानि कर्तुं शक्यन्ते।

(iv) अस्यां न्यूनस्थाने अधिकाः शब्दाः शीघ्रतया लेखितुं शक्यन्ते।

(v) अस्याम् अनुनासिकध्वनीनां कृते पृथक् पृथक् स्वतंत्रवर्णाः (ङ ञ म ण न इति) सन्ति ये विश्वस्य अन्यस्यां लिप्यां न सन्ति।

(vi) अस्यां लेखने, मुद्रणे टंकणे च सर्वत्र वर्णाः समानाः भवन्ति।

(vii) इयं लिपिः संगणकयंत्रस्य कार्यक्रमाणां कृते आदर्शलिपिः अस्ति। अनया बहूनां भारतीयभाषाणां विषयाः संगणकयंत्रे अनूद्य प्रस्तूयन्ते।

## पाठगतप्रश्नाः 28.4

1. प्राचीनकाले शास्त्राणां पठन–पाठनं कथं भवति स्म?
2. चित्रात्मकलिपिः कस्याः भाषायाः अस्ति?
3. संस्कृतहिन्दीभाषयोः का लिपिः अस्ति?
4. देवनागरीलिप्यां लेखने पठने वाचने वा काठिन्यं कथं न भवति?
5. देवनागरीलिप्यां स्वराणां व्यंजनाना×च वर्गीकरणस्य आधारः कः?

## 28.5 किम् अधिगतम्

- भारतयोरोपीयभाषापरिवारे संस्कृतम् प्रमुखतमा भाषा।
- संस्कृतम् शुद्धा, परिष्कृता च प्राचीनतमा आर्यभाषा अस्ति।
- संस्कृतस्य द्वे रूपे स्तः वैदिकं लौकिक×च।
- लौकिकसंस्कृतभाषा पाणिनेः व्याकरणनियमैः नियंत्रिता।
- यदा प्राकृतभाषा व्याकरणस्य नियमेषु आबद्धा जाता तदा अपभ्रंशभाषायाः उद्भवः संजातः
- अपभ्रंशभाषाभ्यः आधुनिकभारतीयभाषाणाम् उत्पत्तिः संजाता।
- भारतीयसंविधानस्य अष्टमअनुसूच्यां द्वाविंशतिसंख्याकाः मान्यताप्राप्ताः भाषाः सन्ति।
- संगणकयंत्रस्य कृते संस्कृतम् अत्यन्तम् उपयुक्तम् अस्ति।
- मुखस्य विभिन्नानि अंगानि वर्णानाम् उच्चारणस्थानानि भवन्ति।
- वर्णानाम् उच्चारणे मुखस्य अंगानां प्रयत्नः भवति। प्रयत्नः द्विविधः भवति– आभ्यन्तरः बाह्यश्च।
- अर्थस्तरे त्रिभिः प्रकारैः परिवर्तनं भवति– अर्थविस्तारेण, अर्थसंकोचेन, अर्थादेशेन।
- भाषायां पदरचना द्विधा भवति– प्रातिपदिकेन सह सुप् प्रत्यययोगेन (बालकः) धातुना सह तिङ् प्रत्यययोगेन च (भवति)
- लिपेः भाषायाः च परस्परं घनिष्ठः संबंधः अस्ति।

- लिपीनां विकासक्रमे प्रथमं चित्रात्मकलिपिः, भावसंकेतलिपिः, वर्णात्मकलिपिः, अक्षरात्मकलिपिः एतासां नामानि प्राप्यन्ते।
- संगणकयंत्रस्य कृते इयम् आदर्शलिपिः।

## 28.6 योग्यताविस्तारः

### (क) साहित्यिकभाषा

या भाषा पारस्परिकव्यवहारभाषायाः किंचिद् भिन्ना, कलात्मकशब्दैः अलंकारैश्च युक्ता भवति, सा साहित्यिकी भाषा मन्यते। साहित्यिकी भाषा पूर्णतः व्याकरणसम्मता भवति। अतः रचितसाहित्यग्रन्थस्य भाषा लोकव्यवहारभाषायाः प्रयोगरूपेण भिन्ना भवति।

### (ख) भाषायाः ध्वनिपरिवर्तनम्

भवन्तः यदा अन्यस्मिन् राज्ये दूरतरस्थानं वा गच्छन्ति तदा तत्रत्यजनानां भाषायां परिवर्तनं पश्यन्ति। तेषां भाषणशैली, वाक्यानां कथनप्रकारम् सर्वम् अन्यदेव भवति। तत्र कारणं किम्? एतत् कदापि चिन्तितम्?

भाषायाः प्रयोक्ता मानवः, तस्य समाजश्च परिस्थितेः अनुसारं परिवर्तितो भवति। अनेन परिवर्तनेन सह तेन प्रयुक्ताः भाषाः अपि परिवर्तिताः भवन्ति। भाषायाः ध्वनयः अपि परिवर्तिताः भवन्ति। ध्वनिपरिवर्तनस्य प्रमुखानि कारणानि एतानि सन्ति।

1. स्थानस्य जलवायुप्रभावः।
2. विदेशीशासकानाम् आक्रमणप्रभावः व्यापारिकसम्बन्धश्च।
3. विदेशीसंस्कृतेः प्रभावः।
4. वैज्ञानिक आविष्काराणां प्रभावः।
5. संस्कृतभाषायाः प्रभावः।
6. प्रयत्नलाधवः।
7. अनुकरणे अपूर्णतायाः प्रभावः।
8. सादृश्यप्रभावः।

उपयुक्तकारणैः भाषायाः ध्वनिषु, अर्थेषु, रूपेषु, वाक्येषु च परिवर्तनम् भवति।

अधुना एतेषां परिवर्तनानाम् उदाहरणानि अत्र पश्यन्तु।

(अ) प्रयत्नलाघवः (–) आदित्यवारः इतवार, तथा पोस्टकार्ड (कार्ड) अल्पेन प्रयासेन परिवर्तनं भवति।

(ब) आगमः– स्त्री, स्थायी, स्थिर, स्टूल इत्यादिशब्देषु 'अ' इति आगमात् अस्थायी, इस्त्री, अस्थिर, इस्टूल इति अशुद्धम् उच्चारणं क्रियते।

(स) लोपः– उच्चारणस्य कठिनतानिवारणाय ध्वनौ वर्णस्य लोपः भवति। यथा– श्रेष्ठः (सेठ) श्वसुरः (ससुर) ज्येष्ठः (जेठ) इति भवति।

(द) विकारः– हस्तः (हाथ) स्तन (थन) श्यामल (सांवला)

(ध) विपर्ययः– मुखसुखाय शब्दे वर्णविपर्ययः क्रियते। यथा– डूबता–बूड़ता। अमरूद–अरमूद।

(न) समीकरणम्– द्वयोः ध्वन्योः स्थाने एका ध्वनिः भवति। चक्रम्–चक्का, कलक्टर–कलट्टर।

(प) विषमीकरणम्– ध्वनिः स्वरूपं परित्यज्य समानध्वनिप्रभावं गृह्णाति। यथा– काकः इति काग भवति।

अन्यानि अपि ध्वनिपरिवर्तनस्य उदाहरणानि सन्ति। यथा सर्पः–सप्प–साँप। जिह्वा–जीभ। शुष्क–सूखा।

अनेन रूपेण भवन्तः अपि मूलध्वनिम् परिवर्त्य वदन्ति। तादृशान् शब्दान् लिखित्वा पश्यन्तु यत् तासु कीदृशं परिवर्तनं जातम्।

## 28.7 पाठान्तप्रश्नाः

1. एकपदेन संस्कृतभाषायाम् उत्तरं लिखन्तु–
   (क) संस्कृतम् कस्य भाषापरिवारस्य भाषा अस्ति? वैदिकरूपं कस्मिन् ग्रन्थे प्राप्यते?
   (ख) संस्कृतस्य लौकिकं रूपं कस्मात् ग्रंथात् प्रारभते?
   (ग) संस्कृतभाषायाः व्याकरणस्य रचयिता कः?
2. (क) बौद्धग्रंथस्य ग्रन्थाः कस्यां भाषायां वर्तन्ते।
   (ख) शौरसेनी, मागधी, महाराष्ट्री इति कस्या भाषायाः भेदाः सन्ति?
   (ग) भारतीयसंविधाने कति संख्याकाः भाषाः मान्यताप्राप्ताः सन्ति?
3. (क) बौद्धधर्मस्य कः ग्रन्थः प्रसिद्धः अस्ति?
   (ख) हिन्दीभाषायाः कस्याः भाषायाः उद्भवः संजातः?
   (ग) हिन्दीभाषायाः उद्भवः कस्याः अपभ्रंशभाषायाः संजातः?
4. निम्नलिखितवाक्येषु शुद्ध उत्तराय (√) इति अशुद्धउत्तराय च (×) इति चिह्ननिर्देशनं कुर्वन्तु–
   (क) संस्कृतभाषा मृतभाषा अस्ति।



टिप्पणी

(ख) प्राकृतभाषायाः प्रयोगः अश्वघोषस्य नाटकेषु प्राप्यते।

(ग) यदा काऽपि भाषा व्याकरणनियमैः बद्धा भवति तदा काऽपि सरला लोकभाषा उत्पद्यते।

(घ) आधुनिकभारतीयभाषाणाम् उद्भवः अपभ्रंशभाषाभिः मन्यते।

(ङ) भारतीयभाषासु संस्कृतस्य प्रभावः न विद्यते।

(च) संस्कृतभाषा देवनागरीलिप्याम् लिख्यते।

5. देवनागरीलिप्याः वैशिष्ट्यं पंचवाक्येषु लिखत।

## 28.8 उत्तराणि

**पाठगतप्रश्नाः**

**28.1**

1. संस्कृतम् इति शब्दस्य अर्थः शुद्धं परिष्कृतं वा भवति।
2. संस्कृतेन प्रभाविताः।
3. शौरसेनी, मागधी, अर्धमागधी, महाराष्ट्री, पैशाची, ब्राचड इति।
4. हिन्दी, ब्रजभाषा–गुजराती–राजस्थानी–हरियाणवी–पंजाबी–कन्नौजी–अवधी–हिमाचली–काश्मीरी डोगरी– पहाड़ीभाषाणाम्।
5. शौरसेनी अपभ्रंशात्।
6. कन्नड़, तमिल–तेलुगु–मलयालम।
7. हिन्दीभाषायै

**28.2**

1. वर्णानाम् उच्चारणे मुखस्य अंगानां क्रियमाणाः चेष्टाः।
2. हृदयं, कण्ठः, तालु, मूर्धा, दन्ताः, जिह्वामूलम्, नासिका, ओष्ठौः।
3. क, ख, ग घ, ङ, च छ ज झ ञ ट ठ ड ढ ण त थ द ध न, प फ ब भ म
4. मूर्धन्याः
5. ङ, ञ, ण, न, म

**28.3**

1. (क) अर्थविस्तारेण (ख) अर्थसंकोचेन (ग) अर्थादेशेन
2. तिलस्य, सर्षपस्य, मत्स्यस्य, मृत्तिकायाः, नारिकेलस्य तैलम् इति।

3. (क) बालक, पुस्तक, पुष्प, वृक्ष, नदी

(ख) पठ्, लिख्, गम्, श्रु, खाद्

| (ग) सुबन्तानि | तिङन्तानि |
|---|---|
| विद्यालयम्, बालकेन | लिखामि, पश्यन्ति |
| वाटिकाम्, गुरवः | अधावत्, गमिष्यति |

4. (क) श्रुतेन
   (ख) चीनीभाषायाः
   (ग) देवनागरीलिपिः
   (घ) अस्यां यादृक् लिख्यते तादृगेव पठ्यते अतः काठिन्यं न भवति।
   (ङ) उच्चारणस्थानानि प्रयत्नाः च।

**28.7 पाठान्तप्रश्नाः**

1. (क) आर्यभाषापरिवारस्य, ऋग्वेदे। (ख) वाल्मीकिरामायणात् (ग) पाणिनः
2. (क) पालिभाषायाम् (ख) अपभ्रंशभाषायाः (ग) द्वाविशतिः भाषाः
3. (क) 'जातकमाला' इति ग्रन्थः (ख) प्राकृतभाषायाः (ग) शौरसेनी अपभ्रंशभाषायाः
4. (क)× (ख) √ (ग) √ (घ) √ (ङ) √ (च) √
5. प×चवाक्यानि स्वेच्छया लिखन्तु।

# 29

# भारतीयसंस्कृतौ संस्काराः

भारतीयसंस्कृतिः प्राचीनतमा। तत्र कारणं किम्? कारणमस्ति वेदोपनिषत् पुराणादिग्रन्थेषु विद्यमानः प्राचीनतमः ज्ञानराशिः। तस्मात् ज्ञानराशेः कारणादेव भारतीयसंस्कृतेः श्रेष्ठत्वम् अद्यापि संसारे सर्वेषां मनो हरति। भारतीयानां जीवनं विविधैः संस्कारैः परिष्कृतं भवति। संस्कृतभाषया भारतीयसंस्कृतेः सुसम्बद्धतापि चिरकालीना गौरवमयी च। संस्कारैः परिष्कृतं जीवनं पुरुषार्थचतुष्टयमाध्यमेन कथं सफलं भवेत् इति एव अस्मिन् पाठे जानीमः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- जीवनदर्शनं स्पष्टीकुर्वन् पुरुषार्थचतुष्टयं वर्णयितुं शक्ष्यति;
- धर्मशब्दस्य व्यापकम् अर्थं लेखितुं शक्ष्यति;
- षोडशसंस्काराणां नामानि लेखिष्यति;
- भारतीयजीवनपद्धतेः वैज्ञानिकतां स्पष्टीकरिष्यति;

## क्रियाकलापः

1. निम्नलिखितचित्रेषु कस्मिन् चित्रे कः संस्कारः दृश्यते इति अधोदत्ते रिक्तस्थाने (क ख ग इत्यादिक्रमेण) लिखतु –



29.1



29.2



29.3



29.4



29.5



29.6

(क) विद्यारंभसंस्कार : ————————————

(ख) विवाहसंस्कार : ————————————

(ग) कर्णवेधसंस्कार : ————————————

(घ) अन्नप्राशनसंस्कार : ————————————

(ङ) मुंडनसंस्कार : ————————————

(च) जातकर्मसंस्कारः ————————————

2. निम्नलिखितेषु कः संस्कारः बाल्यावस्थायां न भवति, रिक्तस्थाने तस्य नाम लिखतु –

(क) नामकरणम् ————————————

(ख) उपनयनम् ————————————

(ग) विवाहसंस्कारः ————————————

## 29.1 अधुना अवगच्छामः

### प्रथमः अंशः

भवन्तः जानन्ति यत् साहित्यं समाजस्य दर्पणः भवति। भारतीयसमाजस्य जीवनपद्धतेः वैशिष्ट्यं संस्कृतवाङ्मये सुनिबद्धम् अस्ति। संस्कृतवाङ्मये एव भारतीयसंस्कृतेः विस्तृतं विवरणं वर्तते।

किं भवद्भिः कदापि चिन्तितं यत् केयं संस्कृतिः? समाजस्य जीवन–यापनविधिः, आचाराः विचाराः, चिंतनं, कर्माणि इत्यादिकं सर्वं सम्मिलितरूपेण संस्कृतिः इति कथ्यते। भारतस्य संस्कृतिः मानवसंस्कृतिः वर्तते। स्व–संस्कृतिकारणादेव भारतं जगति गौरवपूर्णं पदं धत्ते। भारतीयसंस्कृतेः उपादेयता कियती व्यापिका आसीत् इति मनुस्मृतेः अनेन श्लोकेन ज्ञायते –

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

**शब्दार्थाः**
धत्ते–धारण करता है,
उपादेयता – उपयागिता,
सकाशात् – पास से,
अग्रजन्मनः– पहले जन्म लेने वाले को।
शिक्षेरन् – सीखें,
अक्षुण्णा – जो नष्ट न हुई।
विप्लवाः क्रांति उपद्रव।

भारतीयसंस्कृतेः व्यवस्थितरूपं वैदिकयुगे प्राप्यते। अस्यां संस्कृतौ जीवनं प्रति वैज्ञानिकदृष्टिकोणस्य आध्यात्मिकप्रवृत्तेश्च अद्भुतः समन्वयः दृश्यते। यद्यपि परिवर्तनशीले अस्मिन् जगति सर्वत्र सामाजिक–आर्थिक–विप्लवाः जायमानाः सन्ति किंतु भारतीय संस्कृतिः अद्यापि अक्षुण्णा अस्ति।

## 29.2 भारतीयसंस्कृतेः विशेषताः

### भेदेषु अभेदः

भारतीयसंस्कृतिः विभिन्नधर्मभाषाजाति–जनजातीनां सागरः इव वर्तते। अनेकासु भिन्नतासु अपि अत्र समरसता विराजते। अनेकसंस्कृतीनाम् आक्रमणं प्रसह्य अपि भारतीयसंस्कृतिः तथैव गौरवं धत्ते।

भारतीयसंस्कृतौ मानवस्य शारीरिक मानसिक–आध्यात्मिकपक्षाणां विश्लेषणं प्राप्यते। अत्र वर्णव्यवस्था–पुरुषार्थचतुष्टय–आश्रमव्यवस्थासु जीवनस्य सर्वे पक्षाः प्रस्तुताः सन्ति।

### आत्मनः नित्यता पुनर्जन्मसिद्धान्तश्च

भारतीयसंस्कृतौ शरीरम् अतिरिच्य आत्मनः सत्ता अपि स्वीक्रियते। आत्मा अजरः अमरः च अस्ति। केवलं



टिप्पणी

शरीरं नश्यति। देहस्य मृत्योः अनन्तरं आत्मनः अपरशरीरग्रहणं 'पुनर्जन्म' कथ्यते। एषः पुनर्जन्म–सिद्धान्तः भारतीयसंस्कृतेः अपरा विशिष्टता वर्तते। कर्मणाम् अनुसारमेव मानवस्य अग्रिमं जन्म (पुनर्जन्म) भवति। तत्र सत्कर्मभिः सुफलानि, दुष्कर्मभिः च कुफलानि प्राप्यन्ते।

### धर्मस्य प्राधान्यम्

यथा भोजनवस्त्रादिभिः शरीरस्य पोषणं रक्षणम् अस्माकं कर्तव्यं भवति तथैव 'धर्म' इत्याख्यैः सदाचारादिभिः अस्माभिः आत्मनः उन्नतिः करणीया। धर्मस्य नाम भवद्भिः बहुधा श्रुतं भवेत्। धर्मस्य विषये उक्तमस्ति–

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।"

अर्थात् यैः आचरणैः लोकस्य आत्मनः च अभ्युदयः कल्याणं स्यात् – स एव धर्मः। धर्मेण अर्थः कामः च सिद्ध्यतः। तेन एव च अन्ते मोक्षमपि लभ्येत। अतः भारतीयसंस्कृतौ धर्म एव सर्वेषां मूलम् अस्ति।

**शब्दार्थाः**

प्रसह्य – सहन करके,
समाहितान् – समावेश करना (समाविष्ट) संकेंद्रित, मिला लेना।,
पुरुषार्थ –धर्म अर्थ काम तथा मोक्ष ये चार पुरुषार्थ।
अतिरिच्य – अतिरिक्त, अलावा।
अभ्युदयः – लौकिक उन्नति।
निःश्रेयस्य – आत्मिक कल्याण (मोक्ष) की
आयाति – आता है।
प्रतिकूलम् – विपरीत विरुद्ध।
हेयः – त्याग करने योग्य।
दृश्यमान – दिखाई पड़ने वाला।
अपनीयते – हटा लिया जाता है/दूर कर दिया जाता है।
दाहकता – जलाने की शक्ति)
विलीयते – दूर हो जाती है।
क्षारः – राख।, द्रवत्वधर्मः पिघलाहट – घनत्वधर्मम – कठोरता को, ठोसपने को।, जहाति– छोड़ देता है।
सनातनः सदैव रहने वाला।
उद्भवः उत्पत्ति।
क्षमता– सामर्थ्य/शक्ति)

### पुरुषार्थचतुष्टयम्

भारतीयसंस्कृतौ धर्मः, अर्थः, कामः मोक्षश्चेति चत्वारः पुरुषार्थाः सन्ति। पुरुषार्थाः कथम्? पुरुषैः अर्थ्यन्ते इष्यन्ते इति पुरुषार्थाः। एषु चतुर्षु धर्मः अर्थः कामः एते त्रयः पुरुषार्थाः साधनानि सन्ति मोक्षः च साध्यम् अस्ति।

### सर्वे धर्माः समानाः

वस्तुतः धर्मस्य मूलसिद्धान्ताः सर्वेषु सम्प्रदायेषु समानाः एव सन्ति। तेषु यत्र तत्र दृश्यमानः यः कोऽपि भेदः उपलभ्यते, सः भेदः प्रक्रियासु एव भवति न तु सिद्धान्तेषु। सर्वेषां धर्माणां लक्ष्यम् एकमेवास्ति 'मानवता' इति। अत एव सर्वेषाम् कल्याणस्य कामना क्रियते।

भारतीयधर्मः सनातनः अस्ति। प्राचीनतमः ज्ञानराशिः वेदः अस्ति, तस्मात् एव अस्य धर्मस्य उद्भवः। वैयक्तिकाः आचाराः, सामाजिकव्यवहाराः, नीतयः, भावनागतविशेषताश्च अस्य धर्मस्य परिचायकाः सन्ति।

## 29.3 वर्णव्यवस्था

समाजं सुखदं शान्तिपूर्णं च विधातुम् अस्माकं संस्कृतौ व्यक्तीनां क्षमताः विलोक्य शास्त्रेषु वर्णव्यवस्थायाः विश्लेषणं लभ्यते। तत्र ब्राह्मण–क्षत्रिय–वैश्य–शूद्रेति चतुर्णां वर्णानाम् उपक्रमे समाजस्य तत्कालीनव्यवस्थायाः निदर्शनं प्राप्यते।

**शब्दार्थाः**

जीवेम – जीवित रहें। शरदः वर्ष।
विभज्य– बांटकर।
निवृत्तिपरककर्मणाम् – मोक्षसम्बंधी कर्मों का

प्राचीनकाले चत्वारोऽपि वर्णाः मिलित्वा सहयोगेन समाजस्य संघटनं कुर्वन्ति स्म इति तत्र वैज्ञानिकं तथ्यं वर्तते। न कोऽपि वर्णः कस्मादपि हीनतरः हेयः वा आसीत्। एवमेव स्त्रीपुरुषौ अपि लोक–यात्रारूपरथस्य द्वे चक्रे इव गृहस्थजीवने संयुक्तौ आस्ताम्। वर्णव्यवस्था श्रमविभाजनस्य वैज्ञानिकं रूपम् आसीत् यत्र विभिन्नवर्णानां कृते विभिन्नकर्मणां दायित्वं प्रदत्तम् आसीत्।

**आश्रमव्यवस्था**

भारतीयसमाजस्य संरचनायां सर्वेषां वर्णानां जीवनकालः चतुर्षु भागेषु विभक्तः आसीत्। सामान्यतः 'जीवेम शरदः शतम्' इति कथनानुसारं मनुष्यस्य जीवनं चतुर्षु ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–संन्यास आश्रमरूपभागेषु विभज्य आचारस्य विशिष्टानां नियमानां विधानं कृतमस्ति। एतान् नियमान् पालयन् मानवः शतं वर्षाणि जीवति। चत्वारि लक्ष्याणि यथा धर्मः (उचितः आचारः) अर्थः (आजीविका–प्राप्तिप्रयासः) कामः (सांसारिकेच्छा) मोक्षः (मुक्तिः) चतुर्षु आश्रमेषु क्रमशः प्राप्यन्ते। अनेन प्रकारेण पुरुषार्थाः आश्रमाः संस्काराश्च एते सर्वे परस्परं सम्बद्धाः सन्ति। आश्रमधर्माणाम् अनुपालनेन मनसः निर्मलता, पारिवारिक सुखशान्तिः, लौकिकसुखसौविध्यानि च प्राप्यन्ते।

जीवनस्य प्रथमे भागे ज्ञानप्राप्तिः द्वितीयभागे सांसारिकसुखवैभवप्राप्तिः, तृतीयभागे वानप्रस्थाश्रमे निवृत्तिपरक–कर्मणां निष्पादनम्, चतुर्थे सन्यासाश्रमे धर्मरूपसत्कर्मणां निष्पादनं मोक्षप्राप्तये भवति।

इत्थं मानवः आत्मनः शक्तीनां विकासाय स्वजीवनं चतुर्षु विभागेषु विभज्य स्वजीवनकाले एव पुरुषार्थान् साधयति।

**प्रथमांशस्य सारांशः**

साहित्यं समाजस्य दर्पणः संस्कृतेः वाहनं च भवति। समाजस्य जीवनयापनविधिः, आचाराः,विचाराः चिन्तनं कर्माणि इत्यादिकं सर्वं सम्मिलितरूपेण संस्कृतिः इति कथ्यते। भारतीयसंस्कृतेः स्वरूपं वेदोपनिषत्पुराणादिग्रंथेषु प्राप्यते। भारतीयसंस्कृतिः विश्वस्य प्राचीनतमासु संस्कृतिषु एका, यत्र वैज्ञानिकदृष्टिकोणस्य आध्यात्मिकभावस्य च समन्वयः लभ्यते। अत्र शरीरमतिरिच्य आत्मनः सत्ता विद्यते। शरीरस्य नाशानन्तरं आत्मा अपरं शरीरं गृह्णाति। अर्थात् तस्य पुनर्जन्म भवति। आत्मानम् उन्नतं विधातुं सदाचरणानि क्रियन्ते। सदाचरणाय 'धर्मः' प्रमुखः। धर्मेण अर्थः कामश्च सिद्ध्यतः। धर्मेण मोक्षः अपि प्राप्यते। एवं धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः भारतीयसंस्कृतेः मूलविषयाः। तेषु धर्मः श्रेयोरूपः सनातनः भारतीयसमाजे विद्यते।

भारतीयसमाजे ब्राह्मण–क्षत्रिय–वैश्य–शूद्रेति चत्वारः वर्णाः श्रमविभाजनस्य वैज्ञानिकं प्रारूपं प्रस्तुवन्ति। एवमेव मानवजीवनं ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–सन्यासाश्रमरूपेषु चतुर्षु विभागेषु विभज्य शतवर्षात्मकजीवनस्य कल्पना कृता। इत्थं पुरुषार्थाः आश्रमाः संस्काराश्च सर्वे परस्परं सम्बद्धाः सन्ति। एवं हि मानवः जीवनस्य चतुर्षु भागेषु पुरुषार्थान् साधयति।

साहित्य समाज का दर्पण और संस्कृति का वाहक होता है। समाज की जीवनयापन–विधि, आचार, विचार, चिन्तन, कर्म ये सब सम्मिलित रूप से संस्कृति के रूप में जाने जाते हैं। भारतीयसंस्कृति का स्वरूप वेद–उपनिषत् – पुराणादि ग्रंथों में मिला है। भारतीयसंस्कृति विश्व की प्राचीनतम संस्कृतियों में से एक है, जिसमें वैज्ञानिकदृष्टिकोण और आध्यात्मिक भाव का समन्वय है। यहां शरीर के अतिरिक्त आत्मा की सत्ता स्वीकार की गई है। शरीर के नाश होने के बाद आत्मा दूसरा शरीर धारण कर लेती है। इस प्रकार पुनर्जन्म होता है। आत्मा को उन्नत करने के लिए अच्छे आचरण किये जाते हैं। सदाचरण के लिए धर्म प्रमुख है। धर्म से अर्थ और काम सिद्ध होते हैं। धर्म से मोक्ष भी मिलता है। उस प्रकार धर्म–अर्थ–काम–मोक्ष ये चारों पुरुषार्थ भारतीय संस्कृति के मूल तत्त्व हैं। इनमें धर्म का कल्याणकारी रूप है।

भारतीय समाज में प्रचलित संस्कृति में ब्राह्मण–क्षत्रिय–वैश्य–शूद्र ये चार वर्ण श्रमविभाजन का वैज्ञानिक रूप प्रस्तुत करते हैं। इसी प्रकार मानवजीवन को ब्रह्मचर्य गृहस्थ–वानप्रस्थ–सन्यास इन चार आश्रमरूप भागों में बांटकर सौ वर्ष के जीवन की कल्पना की गई है। इस तरह पुरुषार्थ, आश्रम, और संस्कार ये सभी परस्पर सम्बद्ध हैं। इस प्रकार मनुष्य जीवन के चारों भागों में पुरुषार्थों को साधता है।

## पाठगतप्रश्नाः 29.1

1. निम्नलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत –

   (क) भारतीयसंस्कृतेः विस्तृतं चित्रणं कुत्र वर्तते?

   (ख) भारतस्य संस्कृतिः का वर्तते?

   (ग) कः अजरः अमरः च अस्ति?

   (घ) सत्कर्मभिः कीदृशानि फलानि प्राप्यन्ते?

   (ङ) आत्मानम् उन्नतं विधातुं क्रियमाणाः सदाचाराः किं कथ्यन्ते?

   (च) सर्वेषां धर्माणां लक्ष्यं किम् अस्ति?

   (छ) अग्नेः धर्मः किम् अस्ति?

   (ज) ब्राह्मण–क्षत्रिय–वैश्य–शूद्रेति चत्वारः केन नाम्ना ज्ञायन्ते?

   (झ) वर्णव्यवस्था कस्य वैज्ञानिकरूपम् आसीत्?

   (ञ) भारतीयानां जीवनकालः कति आश्रमेषु विभक्तः?

   (ट) पुरुषार्थाः के?

2. अधोलिखितवाक्येषु शुद्धकथनं (√) इति चिह्नेन निर्दिशत –

   (क) भारतीयजीवनपद्धतेः वैशिष्ट्यं संस्कृतवाङ्मये सुनिबद्धमस्ति।

   (ख) भारतीयसंस्कृतिः विश्वस्य प्राचीनतमा संस्कृतिः।

(ग) भारतीयसंस्कृतौ आश्रमव्यवस्था नास्ति।

(घ) शरीरं तिष्ठति किन्तु आत्मा नश्यति।

(ङ) यैः आचरणैः आत्मनः अभ्युदयः भवति सः धर्मः कथ्यते।

(च) पुरुषार्थाः प×च सन्ति।

(छ) स्त्रीपुरुषौ लोकयात्रारूपरथस्य द्वे चक्रे स्तः

3. रिक्तस्थानानि पूरयत –

(क) साहित्यं संस्कृते :---------- भवति।

(ख) भारतीयसंस्कृतिः------- अस्ति।

(ग) आत्मनः देहान्तरप्राप्तिः ---------- कथ्यते।

(घ) यदा अग्नेः धर्मः विलीयते तदा सः --- भवति।

(ङ) मानवः स्वजीवने ------- साधयति।

---

## द्वितीयः अंशः

## 29.4 संस्काराः

दोषाणाम् अपाकरणं, मार्जनं संस्कारः कथ्यते। कस्यापि व्यक्तेः स्वरूपं प्रकाशयितुं तस्य शारीरिक–मानसिक–बौद्धिक परिष्काराय क्रियमाणाः क्रियाः संस्काराः कथ्यन्ते। मानवजीवनस्य विभिन्नेषु अवसरेषु क्रियमाणाः संस्काराः तं बाह्यरूपेण आन्तरिकरूपेण च पवित्रं कुर्वन्ति। तैः मानवे विलक्षणानाम् गुणानां प्रादुर्भावः भवति। तदा सः शुद्धः संस्कृतो भूत्वा योग्यः गुणी नागरिकः भवति। संस्कारविषये महर्षेः व्यासस्य इयम् उक्तिः प्रसिद्धा अस्ति –

**शब्दार्थाः**

अपाकरणम् – दूरकरना।

मार्जनम् – हटाना

अशुभं नश्यते सम्यक् शुभं हि प्रतिपद्यते।
कल्याणनिधिराख्यातः संस्कारः सर्वकर्मसु।।

भवन्तः जानन्ति यत् भवताम् अपि मुण्डनकर्णवेधादिसंस्काराः यथासमयम् अभिभावकैः कारिताः। यद्यपि धर्मग्रन्थेषु गृह्यसूत्रेषु च अनेकेषां संस्काराणां विवरणं प्राप्यते किंतु तेषु सर्वाधिक–लोकप्रियानां षोडश संस्काराणां विषये अत्र वयं ज्ञास्यामः। ते च षोडश–संस्काराः सन्ति–गर्भाधानसंस्कारः, पुंसवनसंस्कारः,सीमन्तोन्नयनसंस्कारः, जातकर्मसंस्कारः, नामकरणसंस्कारः, निष्क्रमणसंस्कारः, अन्नप्राशनसंस्कारः, चूडाकरण (मुण्डन) संस्कारः, कर्णवेध–संस्कारः, विद्यारम्भसंस्कारः, उपनयनसंस्कारः, वेदारम्भसंस्कारः, केशान्तसंस्कारः, समावर्तनसंस्कारः, विवाहसंस्कारः, अन्त्येष्टि–संस्कारश्च।








## (क) जन्मनः पूर्वसंस्काराः

### 1. गर्भाधानसंस्कारः

संतानप्राप्तेः लालसया शास्त्रविधिम् अनुसृत्य स्त्री–पुरुषाभ्यां गर्भाधानं क्रियते। सविधि क्रियमाणः एषः संस्कारः सन्ततेः उत्कर्षाय भवति।

**शब्दार्थाः**
उत्कर्षाय – उन्नति के लिए
विकृतचेतसः – विकार युक्त चित्त वाले। मदान्विताः – अहंकार आदि मदों से युक्त
अर्भकाणाम् – बच्चों का
दायरूपेण बपौती के रूप में)

पितृ–ऋणस्य अपाकरणाय योग्यसन्ततिः आवश्यकी इति भावनया एव भारतीयसंस्कृतौ अस्य–संस्कारस्य परम्परा विद्यते। गुणिनं सन्ततिं प्राप्तुं रजोदर्शनानन्तरं निर्धारित–रात्रिषु एषः संस्कारः क्रियते। तत्र संतुलित–भोजनस्य महत्त्वं वर्तते।

भवन्तः जानन्ति यत् आधुनिके काले सन्ततिनिरोधाय अनेके कृत्रिमोपायाः विधीयन्ते, किन्तु अस्माकं संस्कृतौ तु गुणिनः संतानस्य उत्पत्त्यै संयमपूर्वकं गर्भाधान–संस्कारः क्रियते न तु भोगलिप्सया। सः एव सन्ततिनिरोधस्य उपायः।

महात्मगान्धिना अपि स्व आत्मकथायाम् उक्तम् यत् अर्भकाणां शिक्षा मातुः उदरात् एव प्रारभ्यते। गर्भाधानवेलायां मातुः–पितुश्च शरीरमानसयोः ये स्थिती भवतः तयोः प्रभावः बालके भवति। गर्भकाले पित्रोः आहारविहारयो प्रभावः अपि जायमाने शिशौ पतति। वर्तमान–काले एतस्य संस्कारस्य अभावे प्रायः जनाः विकृतचेतसः मदान्विताश्च भवन्ति, तादृशीः एव सन्ततीः जनयन्ति। पश्चात् दुःखिनः भवन्ति। अतः एषः संस्कारः यथाविधि एव कार्यः।

### 2. पुंसवनसंस्कारः

पुमान् सूयते येन कर्मणा तत् पुंसवनम् इति। गर्भधारणस्य तृतीये मासे पुरुषसन्ततेः लाभार्थं पुरा पुंसवनसंस्कारस्य विधानमासीत्। यद्यपि पुत्रप्राप्तये प्रायः जनानां मनसि महती इच्छा वर्तते परंतु अद्यत्वे सर्वासां पुत्रपुत्रीसन्ततीनां समानं महत्त्वम् अस्ति। गृह्यसूत्रानुसारं होमादिकं विधाय अस्मिन् संस्कारे देवताः प्रार्थ्यन्ते। गर्भिण्याः कृते प्राकृतिकौषधीनां सेवनस्यापि तत्र विधानमस्ति। विविधभोज्यनियमानां पालनेन वीरसन्ततेः प्राप्तये कामना करणीया आसीत्। कन्या वा उत्पद्येत पुत्रो वा, संस्कारपूता संततिः प्रशंसनीया भवति। भ्रूणहत्या निन्दनीया। भारते नारीणां सदा आदरः अभवत्। अतः कन्या सन्ततिः अपि काम्या एव।

### 3. सीमन्तोन्नयनः संस्कारः

अस्मिन् संस्कारे प्रथमगर्भस्य समये षष्ठे अष्टमे वा मासे स्त्रीणां केशपाशमध्ये द्वावपि भागौ विभज्य सीमारेखा क्रियते। 'सीमन्तः कश्यते स्त्रीणां केशमध्ये तु पद्धतिः।' इति वचनानुसारं शुभदिने पतिः गर्भिण्याः पत्न्याः सीमन्तम् उन्नतं कृत्वा केशप्रसाधनं करोति। विभक्ते सीमन्ते स्नुहीकण्टकस्य स्पर्शनस्य विधानमस्ति। सोमदेवतायाः मन्त्रादिभिः स्तुतिं विधाय अनुकूलतां प्राप्तुं प्रयासः क्रियते येन गर्भपातस्य आशङ्का नश्येत।

**शब्दार्थाः**
गर्भिण्याः – गर्भ धारण करने वाली के।
केशपाशमध्ये – बालों के बीच में।
स्नुहीकण्टकस्य – स्नुही (स्याही) नामक पक्षी के काँटे का।
आशङ्काम् – सन्देह को – निवारयितुम् – दूर करने के लिए

## ख. बाल्यावस्थायाः संस्काराः

### 1. जातकर्मसंस्कारः

सन्ततेः जन्मानन्तरं जातकर्मसंस्कारः क्रियते। जातकस्य मेधाबलम् आयुर्बलं वर्धयितुम् एषः संस्कारः क्रियते। नालच्छेदात् पूर्वं सुवर्णद्वारा दधिघृतमधूनि संमेल्य नवजातस्य जिह्वायां लेहनाय प्रदीयते। अनेन नवजाते शिशौ बलाधानस्य कल्पना क्रियते। नवजातस्य भविष्यजीवनं मंगलमयं स्यादित्यभिप्रायेण जातकर्मसंस्कारः क्रियते।

### 2. नामकरणसंस्कारः

गृहे सन्ततेः जन्मकारणात् दशदिनपर्यन्तं जननाशौचः भवति। अतः एकादशे दिने अथवा द्वादशे दिने शुभे दिने वा नवजातस्य नामकरणसंस्कारस्य विधानम् अस्ति। कुलदेवतां संपूज्य जन्मनक्षत्राधारितम् अक्षरं चित्वा मधुसिक्तया दूर्वया शिशोः ओष्ठे नाम लिख्यते। नूतनवस्त्रैः माता शिशुः च अलंक्रियेते। व्यवहारे उपयोगार्थं तस्मै अन्यत् भिन्नं नाम दीयते।

**शब्दार्थाः**
द्रव्यदानम् – धनराशि का दान।
मेधाबलम् – बुद्धि के बल को।
जननाशौचः– जन्म होने के कारण हुई अपवित्रता।
चित्वा – चुनकर
दूर्वया – दूब से
मधुसिक्तया – शहद से लिप्त के द्वारा
नोपयुज्यते – उपयोग नहीं किया जाता है

### द्वितीयांशस्य सारांशः

दोषाणाम् अपाकरणाय भारतीयसमाजे मानवानां संस्काराः क्रियन्ते। संस्कारैः शुद्धीकरणं भवति। शुद्धीकरणात् दुर्गुणानाम् अपाकरणम् भवति। तदनन्तरं मानवः समाजस्य योग्यः नागरिकः भवति। शुद्धयै धार्मिक–क्रियाः क्रियन्ते, संस्काराः विधीयन्ते। एतेषां संस्काराणां विवरणं धर्मशास्त्रेषु गृह्यसूत्रेषु च प्राप्यते।

एषु संस्कारेषु त्रयः संस्काराः जन्मनः प्राक् भवन्ति। षड्संस्काराः बाल्यावस्थायां क्रियन्ते। प×च संस्काराः सन्ति शिक्षासम्बन्धिनः। एकः संस्कारः अस्ति आश्रमसम्बन्धी, एकश्च अन्त्येष्टि–संस्कारः मृत्योरनन्तरं भवति।

दोषों को दूर करने के लिए भारतीय समाज में लोगों के संस्कार किए जाते हैं। संस्कार का अर्थ शुद्धीकरण होता है। शुद्धीकरण से दुर्गुणों का नाश होता है तभी मनुष्य समाज के लिए योग्य नागरिक बनता है। शुद्धीकरण के लिए धार्मिक क्रियाओं द्वारा संस्कार किए जाते हैं।

संस्कारों में तीन संस्कार जन्म से पहले होते हैं। सात संस्कार बचपन में किए जाते हैं। चार संस्कार शिक्षा से संबद्ध हैं। एक संस्कार आश्रम व्यवस्था से संबद्ध है। एक मृत्यु के पश्चात् किया जाता है।

## पाठगतप्रश्नाः 29.2

1. निम्नलिखितप्रश्नानाम् उत्तराणि एकशब्देन लिखत
   (क) दोषाणाम् अपाकरणं कथं भवति?
   (ख) गृहसम्बन्धिविधिविधानानां वर्णनं केषु ग्रन्थेषु प्राप्यते?
   (ग) संस्काराः कतिसंख्याकाः भवन्ति?
   (घ) सन्ततेः उत्पादनात् कस्य ऋणस्य अपाकरणं भवति?
   (ङ) पुंसवनसंस्कारः किमर्थं क्रियते?
   (च) सीमान्तम् उन्नतं कर्तुं कः संस्कारः विधीयते?
   (छ) कस्य जातकर्मसंस्कारः क्रियते?
   (ज) नामकरणसंस्कारः कस्मिन् दिने क्रियते?
2. अधोलिखितवाक्यानां सम्मुखे शुद्धकथनस्य कृते (✓) इति चिह्नेन अशुद्धकथनस्य कृते (×) इति चिह्नेन च निर्दिशत
   (क) संस्कारेण दोषाणां संग्रहः भवति। ––––––
   (ख) संस्कृतो भूत्वा पदार्थः उपयोगाय योग्यः भवति। –––––––







(ग) संस्कारैः गुणानां प्रादुर्भावः भवति। ------

(घ). सन्ततिप्राप्तये गर्भाधानसंस्कारः क्रियते।-------

(ङ) भारतीयसंस्कृतौ संस्कारैः गुणिनः सन्ततेः उत्पत्त्यै सन्ततिनिरोधाय च उपायाः सन्ति।

(च) पुमान् सूयते येन कर्मणा तत् पुंसवनसंस्कारः कथ्यते।-----

(छ) अद्यत्वे पुत्र पुत्रीसन्ततीनां सर्वासां समानं महत्त्वम् अस्ति।

(ज) गर्भिण्याः सीमन्तोन्नयनसंस्कारं काऽपि नारी करोति।------

(झ) जातकस्य मेधाबलं वर्धयितुं जातकर्मसंस्कारः क्रियते।-------

(ञ) गृहे दशदिनपर्यन्तं जननाशौचः भवति।

3. रिक्तस्थानानानि पूरयत–

(क) दोषाणाम् ------------ संस्कारः कथ्यते।

(ख) भारतीयसमाजे ------------ संख्याकाः संस्काराः विद्यन्ते।

(ग) शिशौः जन्मकालिक केशानां कर्त्तनं------------ संस्कारे भवति।

(घ) सीमन्तोन्नयनसंस्कारे स्त्रीणां ------------ सीमारेखा क्रियते।

(ङ) जातकस्य मेधाबलं आयुर्बलं च वर्धयितुं ------------ संस्कारः क्रियते।

(च) नामकरणसंस्कारः ------------ दिने भवति।

---

## तृतीयः अंशः

### 3. निष्क्रमण–संस्कारः

नवजातशिशोः यस्मिन् गृहे जन्म भवति तस्मात् निष्क्रमणाय निष्क्रमण–संस्कारः क्रियते। शिशोः अतिसुकुमारतायाः अवस्था भवति। तस्य अङ्गप्रत्यङ्गानि कोमलानि भवन्ति। शीतोष्णयोः तस्य सुकुमारशरीरे प्रतिकूलः प्रभावः न स्यात् तदर्थं शरीरे दृढ़तायाः आवश्यकता भवति। अत एव चत्वारिंशत् दिनानन्तरं निष्क्रमणसंस्कारः विधीयते। अद्यत्वे तु कतिपयदिनेष्वेव मातुः नवजातस्य च प्रसूतिगृहात् निष्क्रमणं भवति। शुभे दिने नवजातं बहिः निष्कास्य सूर्याय प्रणामस्य प्रथा अस्ति।

**शब्दार्थाः**

निष्क्रमणाय – निकलने के लिए।
शीतोष्णयोः – सर्दी और गर्मी के।
निष्कास्य – निकालकर।
मातृस्तन्यम् – माता का दूध
अन्नप्राशनम् – अन्न खिलाना



टिप्पणी

#### 4. अन्नप्राशनसंस्कारः

गर्भाशये विद्यमाने सति मात्रा भुक्तेन भोजनादिरसेन गर्भस्थशिशोः पालनपोषणं भवति। जन्मानन्तरं मातृस्तन्यं तस्य आधारः भवति। परन्तु शरीरस्य रक्षायै अन्नस्य आश्रयणम् अनिवार्यं भवति। अन्नेनैव मनोभागस्य पुष्टिः भवति। अत एव अन्न–व्यवस्थां सुसंयतां विधातुम् षष्ठे मासे अन्नप्राशन–संस्कारः क्रियते। शिशुं नववस्त्रैः सुसज्जितं कृत्वा नूतनपात्रे पायसं तथा लवणमिश्रितम् अन्नं प्राशनाय तस्मै दीयते।

**शब्दार्थाः**

पायसम् – खीर को।
प्राशनाय – खाने के लिए।
चूड़ाकरणसंस्कार – केशों को काटने का संस्कार।
परिवादः दोषारोपण – निन्दा
परिहारार्थम् – दूर करने के लिए।
धारयित्वा – धारणा कराकर

#### 5. चूडाकरण (मुण्डन) संस्कारः

नवजातस्य प्रथमे, तृतीये प×चमे वा वर्षे शुभे मुहूर्त्ते चूडाकरणसंस्कारः क्रियते। अस्मिन् संस्कारे जन्मकालिकस्य केशसमूहस्य अपनयनं क्रियते।

#### 6. कर्णवेधसंस्कारः

कर्णवेधसंस्कारः अपि शिशोः तृतीये, प×चमे वर्षे वा विधीयते। 'भद्रं कर्णेभिः श्रृणुयाम देवाः' इति मन्त्रैः देवान् संप्रार्थ्य कर्णैः भद्रकल्याणमय–मंगल–युक्तायाः वाण्याः श्रवणं भवेत्, परनिन्दा, परिवादः अश्लीलादिशब्दाः श्रवणपथे प्रविष्टाः न स्युः इति प्रार्थनया एषः संस्कारः विधीयते। द्वयोः कर्णयोः पुटेषु छिद्रं विधाय शिशवे कर्णाभूषणं दीयते। सुश्रुतेन स्वकीये आयुर्वेदशास्त्रे लिखितम् यद् अन्त्रवृद्धिरोगस्य परिहारार्थं बाल्यकाले कर्णवेधः परमावश्यकः।

## (ग) शिक्षया सम्बद्धाः संस्काराः

#### 1. विद्यारम्भसंस्कारः

शिशोः तृतीये प×चमे वा वर्षे विद्यारम्भसंस्कारः क्रियते। शुभमुहर्त्ते तिथौ च कुलदेवतां, गणेशं, सरस्वतीं, च प्रणम्य शिशोः हस्ते लेखनीं धारयित्वा गुरुतुल्येन ज्ञानिना अक्षरारम्भः कार्यते।

#### 2. उपनयनसंस्कारः

वेदस्य अध्ययनार्थं गुरोः समीपे येन कर्मणा नीयते सः संस्कारः उपनयनसंस्कारः इति नाम्ना प्रसिद्धः। अस्मिन् संस्कारे नवतन्तुभिः युक्तं सूत्रं 'यज्ञोपवीतम्' इति धार्यते। अस्मिन् सूर्यस्य आराधनायाः प्रधानता वर्तते। उपनयन–संस्कारः बुद्धेः विकासाय भवति। बुद्धेः विकासः सूर्यस्य आराधनया एव भवितुं शक्नोति। अग्निहोमादिकमपि अस्मिन् संस्कारे प्रधानमस्ति।

**शब्दार्थाः**

परिमार्जयति – शुद्ध कर देता है
पलाशवृक्षः – टेसू का पेड़
सम्पद्यते – सम्पन्न होता है
एकवर्षाभ्यन्तरे – एक वर्ष के अंदर
वटुः – ब्रह्मचारी
मेखला – कमर में बाँधे जाने वाली करधनी
कौपीन – लंगोटी
श्मश्रुकर्त्तनम् – दाढ़ी–मूँछ काटना।
वपनम् – बोना



टिप्पणी



पलाश–वृक्षः स्मरणशक्तेः वर्धनाय दृढ़ीकरणाय च सहायकः मन्यते। अत एव संस्कारे अस्मिन् पलाशदण्डधारणस्य विधानम् अस्ति।

### 3. वेदारम्भसंस्कारः

वेदारम्भसंस्कारः उपनयनेन सहैव अथवा उपनयनस्य द्वितीये दिने सम्पद्यते। आचार्यः गायत्रीमन्त्रस्य उपदेशं ददाति वटुश्च संयमितजीवनं यापयितुं प्रवृत्तः भवति। तदर्थम् आचार्यः वटवे मेखलां, दण्डं, कौपीनं च प्रददाति। एषः संस्कारः अद्यत्वे प्रायः पारम्परिक–गुरुकुलेषु एव विधीयते।

### 4. केशान्तसंस्कारः

चूड़ाकरणसंस्कारसदृशः एव अयं संस्कारः भवति। अस्मिन् संस्कारे केश–कर्त्तनेन सह प्रथमोत्पन्नश्मश्रुकर्त्तनम् अपि भवति तथा च केशानां श्मश्रोः च वपनं पृथिव्यां क्रियते।

### 5. समावर्तनसंस्कारः

समावर्तनसंस्कारः विद्याध्ययनसमाप्ते भवति। आचार्याय श्रद्धाशक्त्यनुसारं गुरुदक्षिणां प्रददाति। आचार्यः स्नातकाय शिष्याय गृहस्थाश्रमं प्रवेष्टुम् आदेशं प्रददाति। गृहस्थजीवने अपि आचार्यः सत्य–धर्म–स्वाध्यायादि–पालनेन मातृ–पितृ–गुरूणां सत्कारपूर्वकं जीवनं यापयितुम् आदिशति – 'सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः' इति।

**शब्दार्थाः**

स्नातकः – शास्त्राध्ययन समाप्त करने वाला।
सवर्णया – अपने वर्ण की (स्त्री) के साथ
पाञ्च भौतिके – पृथ्वी, जल, तेज, वायु, आकाश इन पांच तत्त्वों से निर्मित
अवशिष्यते – बच जाता

## (घ) गृहस्थाश्रमसम्बद्धसंस्कारः

### 1. विवाहसंस्कारः

वेदवेदाङ्गानाम् अध्ययनं समाप्य विद्यां च प्राप्य गुरोः आज्ञया गुणवत्या सवर्णया च स्त्रिया सह विवाहं कृत्वा गृहस्थाश्रमे प्रवेशस्य विधानम् अस्मिन् संस्कारे भवति। अयं संस्कारः पुरुषाय स्त्रिये च द्वाभ्यामापि अत्यन्तं महत्त्वपूर्णः अस्ति। शरीरयोः विभिन्नतायामपि द्वयोः आत्मा एकः भवति। स्त्रीपुरुषयोः मेलनम् एकः धार्मिकसंस्कारः अस्ति। अस्मिन् कामवासनाप्रवृत्तेः प्रमुखता न भवति अपितु संतानसूत्रस्य संचालनाय जीवनस्य विधानं भवति।

## (ङ) मृत्युसम्बद्धः संस्कारः

### अन्त्येष्टिसंस्कारः

पा×चभौतिके शरीरे अग्नितत्त्वम् प्राणरूपेण विद्यते। यदा अग्नितत्त्वं शरीरं त्यजति तदा



29.7

शरीरस्य सर्वाः क्रियाः शान्ताः भवन्ति। शरीरं केवलं शवमात्रमेव अवशिष्यते। भारतीयधर्मे आदिकालादेव प्रथा विद्यते यत् मृतकस्य शवः अग्नये समर्प्यते। शवः चितायां स्थापयते अग्निदेवः शरीरं भस्मीभूतं करोति। त्रिदिनानन्तरं भस्मीभूतशरीरस्य शेषाणि अस्थीनि एकत्रीक्रियन्ते, निकटस्थसागरे सरितायां वा प्रवाह्यन्ते। सामाजिकाः मृतकशरीरस्य आत्मनः मुक्तये प्रार्थयन्ति। अद्यत्वे विभिन्नेषु संप्रदायेषु अन्त्येष्टिसंस्कारस्य विभिन्नानि रूपाणि सन्ति। क्वचित् भूगर्भे शवं संस्थाप्य, क्वचित् जलमध्ये च संस्थाप्य अन्त्येष्टि–संस्कारः विधीयते।

## तृतीयांशस्य सारांशः

बाल्यावस्थायाः संस्कारेषु जातकर्म–नामकरणसंस्कारानन्तरं जातकस्य प्रसूतिगृहात् निष्क्रमणं भवति। तदा–पर्यन्तं तस्य शरीरे बाह्यवातावरणं सोढुं शक्तिः उत्पद्यते। षष्ठे मासे तस्य अन्नप्राशनं विधीयते येन बालस्य शरीरम् अन्नेन पुष्येत। जन्मकाले तस्य शिरसः संस्कारः चूडाकरणसंस्कारनाम्ना भवति। तदुत्तरं श्रवणरोगापनयनार्थं श्रवणशक्तेः वृद्ध्यर्थञ्च कर्णवेधसंस्कारः क्रियते। तदनन्तरं तृतीये पञ्चमे वा वर्षे तस्य विद्यारम्भसंस्कारः विधीयते। शिक्षाग्रहणाय गुरोः आश्रमे तं नीत्वा पिता आचार्याय समर्पयति। तदैव तस्य उपनयनसंस्कारः विधीयते। तत्र तस्मै यज्ञोपवीतं दत्वा दैवीगुणैः संपूर्य विद्याध्ययनाय प्रवृत्तिः विधीयते। गुरोः आश्रमे एव तस्य वेदारम्भोऽपि जायते। तदुत्तरं केशान्तसंस्कारः गुरोः आश्रमे एव विधीयते। अन्ते च युवा सुशिक्षितो भूत्वा ब्रह्मचर्याश्रमं परित्यज्य गृहस्थाश्रमं प्रवेष्टुमुद्यतः भवति। तस्मिन् काले तस्य समावर्तनसंस्कारः भवति। गृहस्थोपयोगिभिः उपदेशैः आचार्यः तं गृहस्थाश्रमे धर्माचरणाय प्रवर्तयति।

समाजे गृहस्थधर्मोचितव्यवहाराय विवाहसंस्कारः तस्य च देहान्ते कुटुम्बिभिः अन्त्येष्टि संस्कारः सम्पद्यते।

बचपन के संस्कारों में जातकर्म–नामकरणसंस्कार के बाद जातक का प्रसूतिगृह से निष्क्रमण होता है। तब तक उसके शरीर में बाहरी वातावरण की शक्ति आ जाती है, छठे मास में उसका अन्नप्राशन किया जाता है जिससे बालक का शरीर अन्न से मजबूत हो सके। तब जन्म के समय सिर पर उगे बालों की जटा को हटाकर सिर का संस्कार किया जाता है, जिसे चूडाकरण संस्कार कहते हैं। कान के रोगों को दूर करने के लिए और सुनने की शक्ति बढ़ाने के लिए कर्ण–वेधसंस्कार किया जाता है। तीसरे या पांचवें वर्ष में उसका विधारम्भ संस्कार किया जाता है जिससे वह पढ़ना लिखना शुरु कर देता है। बाद में विधिपूर्वक शिक्षा ग्रहण करने के लिए उसे गुरु के आश्रम के उचित वातावरण में पहुंचा दिया जाता है। वहां उसका उपनयन संस्कार होता है। तदुपरांत उसे यज्ञोपवीत पहनाकर दैवीगुणों से युक्त कर अध्ययन में लगा दिया जाता है। गुरु के आश्रम में ही वह वेदारम्भ करता है। गुरु के आश्रम में ही उसका केशान्तसंस्कार

भी होता है। अंत में सुशिक्षित होकर युवा–स्नातक ब्रह्मचर्याश्रम छोड़कर गृहस्थाश्रम में प्रवेश करता है। उस समय आचार्य उसका समावर्तन संस्कार करके गृहस्थाश्रम में धर्माचरण के लिए उपदेश देता है।

स्नातक समाज में आकर विवाह संस्कार कर गृहस्थ के कर्त्तव्यों का पालन करता है। उपयुक्त आचरण करके वह अंत में अपने शरीर का त्याग करता है। कुटुम्बी जन उसके शरीर का अन्त्येष्टि संस्कार करते हैं।

## पाठगतप्रश्नाः 29.3

1. निम्नलिखितप्रश्नानाम् उत्तराणि एकशब्देन लिखत
   (क) नवजातशिशोः प्रसूतिगृहात् निस्सारणे कः संस्कारः भवति?
   (ख) अन्नप्राशनसंस्कारे बालकाय प्रथमं भोजनाय किं दीयते?
   (ग) चूडाकरणसंस्कारस्य अपरं नाम किमस्ति?
   (घ) श्रवणशक्तेः वृद्ध्यर्थं कः संस्कारः क्रियते?
   (ङ) शिशोः विद्यारम्भसंस्कारः कस्मिन् वर्षे भवति?
   (च) उपनयनसंस्कारे बालकः कुत्र नीयते?
   (छ) समावर्तनसंस्कारः कदा भवति?
   (ज) कः संस्कारः जीवनस्य पूर्णतायाः प्रतीकः अस्ति?
   (झ) शरीरत्यागानन्तरं कः संस्कारः भवति?
2. अधोलिखितवाक्येषु शुद्धकथनं (√) इति चिह्नेन निर्दिशत –
   (क) अधुना नवजातशिशोः चतुर्थे मासे निष्क्रमण–संस्कारस्य प्रथा लुप्ता जाता।
   (ख) अन्नप्राशनेन शिशोः मनोभागस्य पुष्टिः न भवति।
   (ग) चूड़ाकरणसंस्कारः तृतीये प×चमे वर्षे वा क्रियते।
   (घ) द्वयोः कर्णयोः पुटेषु छिद्रं कर्णवेधसंस्कारे विधीयते।
   (ङ) शिशोः विद्यारम्भसंस्कारः विद्यालये भवति।
   (च) उपनयनसंस्कारे सूर्यस्य आराधनायाः प्रधानता वर्तते।
   (छ) उपनयनसंस्कारः बालिकानां न भवति।
   (ज) वेदारम्भसंस्कारः गुरुकुलेषु एव भवति।
   (झ) समावर्तनसंस्कारे आचार्याय दक्षिणा दीयते।
   (ञ) विवाहसंस्कारः सन्तानोत्पत्तये विधीयते।

3. रिक्तस्थानानि पूरयतः

(क) शिशोः जन्म यस्मिन् गृहे भवति तद्गृहं ------- कथ्यते।

(ख) अन्नप्राशनसंस्कारे शिशवे ---------- दीयते।

(ग) चूडाकरणसंस्कारः ----------- समूहस्य अपनयेन भवति।

(घ) कर्णवेधसंस्कारेण --------- प्रतिरोधः भवति।

(ङ) विद्यारम्भसंस्कारः------ वर्षे भवति।

(च) उपनयनसंस्कारे बालकाय--------- दीयते।

(छ) वेदारम्भसंस्कारे आचार्यः शिष्याय--------- ददाति।

(ज) यदा विद्यार्थी स्नातको भवति तदा ---------- संस्कारः भवति।

---

## 29.5 किम् अधिगतम्

- अस्माकं शारीरिक–मानसिकाध्यात्मिकाचरणानां रीतयः संस्कृतिनाम्ना ज्ञायन्ते।
- वेदोपनिषत्पुराणादिग्रन्थेषु विद्यमानः प्राचीनतमः ज्ञानराशिः भारतीयसंस्कृतिः।
- संस्कृतवाङ्मये निर्दिष्टैः संस्कारैः भारतीयानां जीवनं परिष्कृतम्।
- भारतीयसंस्कृतिः संस्कृतसाहित्ये प्रतिबिम्बिता।
- भारतीयसंस्कृतौ शरीरमतिरिच्य आत्मनः सत्ता वर्तते।
- शरीरे नष्टे आत्मा न नश्यति स च देहान्तरं प्राप्नोति।
- आत्मानम् उन्नतं कर्तुं सदाचाराः प्रमुखाः सदाचाराय च धर्मः प्रमुखः।
- धर्मार्थकाममोक्षाः भारतीयसंस्कृतेः मूलतत्त्वानि।
- ब्राह्मणक्षत्रियवैश्यशूद्रेति चत्वारः वर्णाः श्रमविभाजनस्य वैज्ञानिकं रूपं प्रस्तुवन्ति।
- ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–सन्यासेति चत्वारः आश्रमाः वर्तन्ते। एते आश्रमाः मानवजीवने विकासस्य क्रमिक–सोपानानि सन्ति।
- दोषाणाम् अपहारकाः संस्काराः भवन्ति।
- गर्भाधान–पुंसवन–सीमन्तोन्नयन–जातकर्म– नामकरण–निष्क्रमण–अन्नप्राशन – चूडाकरण – कर्णवेध–विद्यारंभ–उपनयन– वेदारम्भ– केशान्त–समावर्तन–विवाह–अन्त्येष्टि इति षोडशसंस्काराः सन्ति।
- संस्कारैः संस्कृतो भूत्वा मानवः समाजस्य राष्ट्रस्य योग्यः उपयोगी नागरिकः भूत्वा पुरुषार्थचतुष्टयं साधयति।

## 29.6 योग्यताविस्तारः

संस्काराः अधोलिखितानां जीवनमूल्यानाम् आधाराः सन्ति।

त्यागः, तपः, परोपकारः, निष्काम–कर्म, कर्त्तव्यनिष्ठा, धार्मिक–सहिष्णुता, समन्वयभावः, सत्यं शिवं सुन्दरम्, संयमः, अहिंसा, दानम्, संतोष, विश्वबन्धुत्वभावः, राष्ट्रियैकतायाः भावः।

## 29.7 पाठान्तप्रश्नाः

1. संस्कृतवाङ्मयस्य के ग्रन्थाः भारतीयसंस्कृतेः परिचयं प्रस्तुवन्ति?
2. धर्मस्य किं लक्षणम्?
3. चत्वारः वर्णाः के?
4. के चत्वारः आश्रमाः?
5. संस्कारस्य किं लक्षणम्?
6. संस्काराः कति सन्ति?
7. बाल्यावस्थायाः के संस्काराः सन्ति?
8. पुंसवनसंस्कारः कस्य भवति?
9. जननाशौचः कति दिनानां भवति?
10. मुण्डनसंस्कारः कदा भवति?
11. कर्णवेधसंस्कारेण किं भवति?
12. स्नातकस्य कः संस्कारः भवति?
13. भारतीयसंस्कृते विशिष्टताः प×चवाक्येषु लिखत।
14. वाक्यत्रयेण पुरुषार्थचतुष्टयं वर्णयत।
15. केषा×िचत् प×चसंस्काराणां महत्त्वं स्वशब्देषु लिखत।

## 29.8 उत्तराणि

**क्रियाकलापः**

1. च, क, ग, ड., घ, ख,  2. विवाहसंस्कारः

## पाठगत प्रश्नाः

**29.1**

1. (क) संस्कृतवाङ्मये, (ख) मानव–संस्कृतिः (ग) आत्मा, (घ) सुफलानि, (ङ) धर्मः (च) मानवता (छ) दाहकता, (ज) वर्णाः (झ) श्रमविभाजनस्य, (ञ) चतुर्षु (ट) धर्मः, अर्थः कामः मोक्षश्च।
2. (क) √ (ख) √ (ग) × (घ) × (ङ) √

   (च) × (छ) √
3. (क) वाहनम् (ख) मानवसंस्कृतिः (ग) पुनर्जन्म (घ) क्षारः (ङ) पुरुषार्थान्

**29.2**

1. (क) संस्कारेण (ख) गृह्यसूत्रेषु (ग) षोडश (घ) पितृ–ऋणस्य (ङ) पुरुषसन्ततिप्राप्तये (च) सीमन्तोन्नयनम् (छ) नवजातशिशोः (ज) एकादशदिने
2. (क) × (ख) √ (ग) √ (घ) √ (ड. ) √

   (च) √ (छ) √ (ज) × (झ) √ (ञ) √

   (ट) √
3. (क) मार्जनम् (ख) षोडश (ग) चूडाकरण (घ) केशेषु (ङ) उपनयन (च) एकादशे

**29.3**

1. (क) निष्क्रमणसंस्कारः (ख) क्षीरम् (ग) मुण्डनसंस्कारः (घ) कर्णवेधः (ङ) तृतीये प×चमे वा वर्षे (च) गुरोः समीपे (छ) विद्याध्ययन समाप्तौ (ज) विवाहसंस्कारः (झ) अन्त्येष्टि संस्कारः
2. (क) √ (ख) × (ग) √ (घ) √ (ङ) × (च) √ (छ) √ (ज) √ (झ) √ (ञ) √
3. (क) प्रसूतिगृहम् (ख) पायसम् (ग) केशानाम् (घ) अन्त्रवृद्धिरोगस्य (ङ) तृतीये प×चमे वा (च) यज्ञोपवीतम् (छ) गायत्रीमन्त्रम् (ज) समावर्तनः

**29.7 पाठान्तप्रश्नाः**

स्वयं कुर्वन्तु।